# Ramatapinyupanishat Savyakhya

# રામતાપિન્યુપનિષત્ સવ્યાખ્યા

## Document Information

Text title : Ramatapini Upanishad with Commentary by Upanishadbrahmayogin

File name : rAmatApinyupaniShatsavyAkhyA.itx

Category : upanishhat, raama, upaniShat, rAma, atharvaveda, vyAkhyA

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description-comments : 55 / 108; Atharva Veda - Vaishnava upanishad

Latest update : October 30, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2025

*sanskritdocuments.org*

# રામતાપિન્યુપનિષત્ સવ્યાખ્યા

## શ્રીરામપૂર્વતાપિની

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## પ્રથમોપનિષત્

રામનામાર્થપ્રકાશનં
ચિન્મયેઽસ્મિન્ મહાવિષ્ણૌ જાતે દશરથે હરૌ ।
રઘોઃ કુલેઽખિલં રાતિ રાજતે યો મહીસ્થિતઃ ॥ ૧॥

સ રામ ઇતિ લોકેષુ વિદ્વદ્ભિઃ પ્રકટીકૃતઃ ।
રાક્ષસા યેન મરણં યાન્તિ સ્વોદ્રેકતોઽથવા ॥ ૨॥

રામનામ ભુવિ ખ્યાતમભિરામેણ વા પુનઃ ।
રાક્ષસાન્ મર્ત્યરૂપેણ રાહુર્મનસિજં યથા ॥ ૩॥

પ્રભાહીનાંસ્તથા કૃત્વા રાજ્યાર્હાણાં મહીભૃતામ્ ।
ધર્મમાર્ગં ચરિત્રેણ જ્ઞાનમાર્ગં ચ નામતઃ ॥ ૪॥

તથા ધ્યાનેન વૈરાગ્યમૈશ્વર્યં સ્વસ્ય પૂજનાત્ ।
તથા રાત્યસ્ય રામાખ્યા ભુવિ સ્યાદથ તત્ત્વતઃ ॥ ૫॥

રમન્તે યોગિનોઽનન્તે નિત્યાનન્દે ચિદાત્મનિ ।
ઇતિ રામપદેનાસૌ પરં બ્રહ્માભિધીયતે ॥ ૬॥

શ્રીરામતાપનીયાર્થં ભક્તધ્યેયકળેબરમ્ ।
વિકળેબરકૈવલ્યં શ્રીરામબ્રહ્મ મે ગતિઃ ॥

ઇહ ખલુ અથર્વણવેદપ્રવિભક્તેયં શ્રીરામતાપિનીયોપનિષત્ પૂર્વોત્તરતાપિનીભ્યાં સોપાયસવિશેષનિર્વિશેષબ્રહ્મસ્વરૂપપ્રકટના
બ્રહ્મમાત્રપર્યવસન્ના વિજયતે । અસ્યાઃ સ્વલ્પગ્રન્થતો વિવરણમારભ્યતે । મુમુક્ષૂનુપલભ્ય અવાન્તરરૂપેણ પ્રવૃત્તેયં પૂર્વતાપિનીશ્રુતિરિતિ યત્તત્ સવિશેષબ્રહ્મવિદ્યાસ્તુત્યર્થં આદૌ સ્વાજ્ઞસ્વજ્ઞદૃષ્ટિમાશ્રિત્ય રામનામાર્થં પ્રકાશયતિ-ચિન્મય ઇત્યાદિના । ચિન્મયે ચિન્માત્રે હરૌ સ્વાજ્ઞાનતત્કાર્યહારિણિ વિષ્ણૌ સર્વવ્યાપકે
પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥

ઇતિ સ્વપ્રતિજ્ઞાપરિપાલનાર્થં અસ્મિન્ દશરથે કશ્યપપ્રજાપત્યવતારે નિષ્ઠાદ્વયપરિપાલનાય જાતે આવિર્ભૂતે સત્યથ બાલલીલયા રઘોઃ કુલે અખિલં સ્વજનવર્ગં યો રાતિ આનન્દયતિ યો મહીસ્થિતઃ સન્ સ્વતેજસા સ્વવિભૂત્યા ચ રાજતે ॥ ૧॥ એવં ભૂરાદિસર્વલોકેષુ સ એવ રામઃ ઇતિ વિદ્વદ્ભિઃ તદ્યાથાત્મ્યજ્ઞૈઃ પ્રકટીકૃતો ભવતિ । ભઙ્ગ્યન્તરેણ રામનામાર્થં નિર્દિશતિ-રાક્ષસા ઇતિ । વિરાધાદિરાક્ષસા યેન મરણં યાન્તિ સ્વોદ્રેકતઃ સ્વપાપકૃત્યતો વા ॥ ૨॥ પુનઃ અભિરામેણ સર્વલોકમનોરમણરૂપેણ વા રામનામ ભુવિ ખ્યાતં સ્યાદિત્યર્થઃ । રાક્ષસા ઇત્યત્ર રેફાર્ણો ગૃહ્યતે, મરણં યાન્તિ ઇત્યત્ર મકારઃ, વર્ણદ્વયયોગે રામો ભવતિ । પુનઃ પ્રકારાન્તરેણ રામનામોદ્ધરતિ-રાક્ષસાનિતિ । યથા રાહુઃ ચન્દ્રં નિષ્પ્રભં કરોતિ ॥ ૩॥ તથા અયં મર્ત્યરૂપેણ રાક્ષસાન્ પ્રભાહીનાન્ કૃત્વા અથ રાજ્યાર્હાણાં મહીભૃતાં સતાં સ્વચરિત્રેણ સર્વપ્રાણિસ્વાશ્રમોચિતધર્મમાર્ગં ઉપદિશન્ સ્વાતિરિક્તાશ્રયાસમ્ભવપ્રબોધસિદ્ધનિષ્પ્રતિયોગિકબ્રહ્મમાત્રરૂપે યો રાજતે યઃ સ્વે મહિમ્નિ મહીયતે સ રામ ઇતિ સ્વનામ્ના જ્ઞાનમાર્ગં પ્રકાશયન્ ॥ ૪॥ સ્વમૂર્તિધ્યાનેન સ્વાતિરિક્તપદાર્થવૈરાગ્યં જનયન્, સ્વપૂજનતો બ્રહ્માદ્યૈશ્વર્યં દિશન્ યોઽવતિષ્ઠતે તસ્ય રામાખ્યા સર્વત્ર રાતીતિ ભુવિ સ્યાત્ । અસ્ય રામાખ્યા કથમિત્યત્ર રાક્ષસાન્ મર્ત્યરૂપેણ રાહુઃ મનસિજં રાજ્યાર્હાણાં મહીભૃતામિતિ રેફમકારયોજનતો રામાખ્યા સ્યાદિત્યર્થઃ । લોકદૃષ્ટ્યા એવં નામ પ્રકાશયિત્વા વસ્તુદૃષ્ટ્યા અસ્ય નામાર્થં નિર્દિશતિ-અથેતિ ॥ ૫॥ સર્વાપહ્નવસિદ્ધનિષ્પ્રતિયોગિકબ્રહ્મમાત્રપર્યવસાનતયા મનો યુઞ્જન્ત ઇતિ યોગિનઃ સમ્યજ્જ્ઞાનિનોઽનન્તે પરિચ્છેદત્રયાપહ્નવસિદ્ધે નિત્યભૂમાનન્દે ચિદાત્મનિ ચિન્માત્રે તન્માત્રાવશેષતયા રમન્ત ઇતિ રામપદેન અસૌ ભગવાન્ પરં બ્રહ્માભિધીયતે, “રામ એવ પરં બ્રહ્મ” ઇતિ શ્રુતેઃ ॥ ૬॥

ઉપાસકાર્થે નિર્વિશેષસ્ય રૂપકલ્પના
ચિન્મયસ્યાદ્વિતીયસ્ય નિષ્કલસ્યાશરીરિણઃ ।
ઉપાસકાનાં કાર્યાર્થં બ્રહ્મણો રૂપકલ્પના ॥ ૭॥

રૂપસ્થાનાં દેવતાનાં પુંસ્ત્ર્યઙ્ગાસ્ત્રાદિકલ્પના ।
દ્વિચત્વારિષડષ્ટાનાં દશ દ્વાદશ ષોડશ ॥ ૮॥

અષ્ટાદશામી કથિતા હસ્તાઃ શઙ્ખાદિભિર્યુતાઃ ।

સહસ્રાન્તાસ્તથા તાસાં વર્ણવાહનકલ્પના ॥ ૯॥

શક્તિસેનાકલ્પના ચ બ્રહ્મણ્યેવં હિ પઞ્ચધા ।
કલ્પિતસ્ય શરીરસ્ય તસ્ય સેનાऽऽદિકલ્પના ॥ ૧૦॥

અનેન મન્ત્રેણ રામસ્ય નિર્વિશેષત્વમવગમ્યતે, તથાવિધસ્ય સવિશેષત્વં કુતઃ? ઇત્યત આહ-ચિન્મયસ્યેતિ । ચિન્મયસ્યેત્યાદિવિશેષણવિશિષ્ટબ્રહ્મણો નિર્વિશેષત્વેન વિકલ્પાસહત્વેऽપિ ભક્તપટલસ્વપદાત્યુપાયાર્થં રૂપાદિવિશેષકલ્પના, ન સ્વત ઇત્યર્થઃ ॥ ૭॥ ઉપાસકસ્વપદાપ્તિનિમિત્તકલ્પનાં પ્રપઞ્ચયતિ-રૂપેતિ । નિર્વિશેષબ્રહ્મમાત્રસ્વરૂપે રામે સ્વાજ્ઞાદિદૃષ્ટ્યા ભેદાભેદરૂપેણ તિષ્ઠન્તીતિ રૂપસ્થાઃ તાસાં દેવતાનાં સીતારામતદંશભેદેન દ્વિચત્વારિષડષ્ટાનાં સશક્તિકાનાં પુંસ્ત્ર્યઙ્ગાસ્ત્રાદિકલ્પના તદધિકરણરામોપાસનાર્થૈવ । સીતયા સહ દ્વિત્વં, લક્ષ્મણાદિભિઃ ચતુસ્સઙ્ખ્યાવિશિષ્ટત્વં સુગ્રીવવિભીષણાદિભિઃ ષટ્સઙ્ખ્યાપૂરકત્વં, ધૃષ્ટ્યાદિસચિવૈઃ અષ્ટસઙ્ખ્યાપૂરકત્વમ્ । તાસાં સીતારામાંશવિકલ્પિતાનાં નરવાનરરાક્ષસભેદેન સેનાસઙ્ખ્યા નિગદ્યતે । એકૈકસ્યામિહ સેનાऽધિપા દશ દ્વાદશ ષોડશ અષ્ટાદશ હસ્તા વર્તન્તે ઇતિ કથિતાઃ, “મહાપદ્મશતં હસ્તં” ઇતિ ગણિતશાસ્ત્રપ્રસિદ્ધેઃ ॥ ૮॥ કસ્યાશ્ચિત્ દેવતાયાઃ શઙ્ખાદિસઙ્ખ્યાભિઃ યુતાઃ સહસ્રાન્તાઃ પરિવારાઃ સન્તિ ॥ ૯॥ આદૌ રામે બહુદેવતાકલ્પના તતસ્તાસાં વર્ણકલ્પના વાહનકલ્પના એકૈકકાર્યનિર્વાહકશક્તિકલ્પના અગણ્યસેનાકલ્પનેત્યેવં બ્રહ્મણ્યેવં હિ રામે પઞ્ચધા કલ્પના વિકલ્પિતા । એવં પઞ્ચધાકલ્પના નિર્વિશેષબ્રહ્મણો રામસ્યેત્યત આહ-કલ્પિતસ્યેતિ । ભક્તપટલસ્વપદાપ્ત્યુપાયતયા કલ્પિતસ્ય શરીરસ્યૈવ સેનાऽऽદિકલ્પના, સ્વસ્ય નિરુપાધિકત્વેન નિર્વિકલ્પત્વાત્ ॥ ૧૦॥

મન્ત્રજપયન્ત્રપૂજયોઃ રામપ્રસાદકરત્વં
બ્રહ્માદીનાં વાચકોऽયં મન્ત્રોऽન્વર્થાદિસંજ્ઞિતઃ ।
જપ્તવ્યો મન્ત્રિણા નૈવં વિના દેવઃ પ્રસીદતિ ॥ ૧૧॥

ક્રિયાકર્મેજ્યાકર્તૃણામર્થં મન્ત્રો વદત્યથ ।
મનનાત્ ત્રાણના(તારણા)ન્મન્ત્રઃ સર્વવાચ્યસ્ય વાચકઃ ॥ ૧૨॥

સોऽભયસ્યાસ્ય દેવસ્ય વિગ્રહો યન્ત્રકલ્પના ।
વિના યન્ત્રેણ ચેત્ પૂજા દેવતા ન પ્રસીદતિ ॥ ૧૩॥

ઇત્થમ્ભૂતરામપ્રસાદહેતુઃ કઃ? ઇત્યાશઙ્ક્ય તદ્વાચકો મન્ત્રઃ ષડક્ષરાદિઃ તત્પૂજાપીઠં ચેત્યાહ- બ્રહ્માદીનામિતિ । રામસ્ય સર્વદેવાત્મકત્વેન રામાન્વર્થસંજ્ઞિતો મન્ત્રો બ્રહ્માદીનામપિ વાચક એવ । યતો મન્ત્રાનુષ્ઠાનં વિના દેવો ન પ્રસીદતિ અતો મન્ત્રિણા મન્ત્રૈકશરણેન અયં મનુઃ જપ્તવ્યો ભવતિ ॥ ૧૧॥ મન્ત્રાર્થં વ્યુત્પાદયતિ-ક્રિયેતિ । ક્રિયા વ્યાપારઃ, દ્વિતીયાન્તોપાત્તં કર્મ, ઇજ્યા યજ્ઞઃ, કર્તા યજમાનઃ, તેષાં મહાતાત્પર્યં યત્ર પર્યવસ્યતિ તમેતમર્થં અયં મન્ત્રો વદતિ મન્ત્રાર્થસ્ય પ્રત્યગભિન્નબ્રહ્મણિ પર્યવસિતત્વાત્ । અથ સર્વવાચ્યવસ્તુનો રામચન્દ્રસ્ય યો વાચકો ભવતિ સ્વમનનમાત્રતો મન્તારં સ્વાતિરિક્તાસ્તિત્વભ્રમવારિધેઃ વારણાત્ મન્ત્ર ઇતિ વ્યુત્પત્તિઃ યુજ્યત ઇત્યર્થઃ ॥

૧૨॥ ઇતશ્ચ દેવતાપ્રસાદહેતુઃ દેવપૂજા ઇત્યાહ-સ ઇતિ । શુદ્ધાદ્વૈતતયા અભયસ્યાસ્ય દેવસ્ય યો વિગ્રહઃ સોઽયં યન્ત્રકલ્પનારૂપો ભવતિ । યથા યન્ત્રપૂજયા દેવતા પ્રસીદતિ તથા વિગ્રહપૂજયા ન પ્રસીદતીત્યર્થઃ ॥ ૧૩॥

ઇતિ પ્રથમોપનિષત્ ।

## દ્વિતીયોપનિષત્

રામબીજસ્ય સર્વાત્મકત્વં
સ્વભૂર્જ્યોતિર્મયોઽનન્તરૂપી સ્વેનૈવ ભાસતે ।
જીવત્વેન સમો યસ્ય સૃષ્ટિસ્થિતિલયસ્ય ચ ॥ ૧॥

કારણત્વેન ચિચ્છક્ત્યા રજઃસત્ત્વતમોગુણૈઃ ।
યથૈવ વટબીજસ્થઃ પ્રાકૃતશ્ચ મહાન્ દ્રુમઃ ॥ ૨॥

તથૈવ રામબીજસ્થં જગદેતચ્ચરાચરમ્ ।
રેફારૂપા મૂર્તયઃ સ્યુઃ શક્તયસ્તિસ્ર એવં ચેતિ ॥ ૩॥

સ્વસ્ય સ્વબીજાત્મના સર્વકારણત્વમાહ-સ્વભૂરિતિ । હેત્વન્તરં વિના સ્વયમેવ ભવતીતિ સ્વભૂઃ જ્યોતિર્મયઃ પ્રકાશમાત્રત્વાત્ "પ્રકાશઃ પર્યવસ્યતિ" ઇતિ શ્રુતેઃ । અનન્તરૂપી સ્વાજ્ઞદૃષ્ટ્યા અનેકરૂપી સર્વાત્મકત્વાત્ । એવં સ્વેનૈવ ભાસતે સ્વયમ્પ્રકાશત્વાત્ । યસ્ય સૃષ્ટિસ્થિતિપ્રળયવતઃ સ્વાતિરિક્તપ્રપઞ્ચસ્ય જીવત્વેન કાર્યોપાધિના ઈશ્વરોપાધિકારણત્વેન ચિચ્છક્ત્યા પ્રતીચા તદ્ભાસ્યરજસ્સત્વતમોગુણૈર્વા સમ ઇત્યત્ર માનં ઓમિતિ । ઓઙ્કારસ્ય અભિધાનાભિધેયરૂપેણ સર્વસમત્વાત્ "સમ એભિઃ સર્વૈઃ" ઇતિ શ્રુતેઃ । રામરહસ્યે વટબીજદૃષ્ટાન્તશ્રુતિઃ વ્યાખ્યાતા । રાં ઇતિ રામબીજે રેતિ વ્યઞ્જનતો બ્રહ્મેત્યુચ્યતે, તદુપરિ શ્રૂયમાણાકારતો વિષ્ણુઃ, મકારતઃ શિવઃ ઇતિ રેફારૂપાઃ ત્રિમૂર્તયઃ સ્યુઃ । તત્રત્યદીર્ઘઃ છાન્દસઃ । સરસ્વતીલક્ષ્મીગૌરીભેદેન ક્રિયાજ્ઞાનેચ્છાભેદેન વા શક્તયઃ તિસ્ર એવ ચેતિ । દ્વિતીયોપનિષત્સમાપ્ત્યર્થશ્ચ ચશબ્દઃ ॥ ૧-૩॥

ઇતિ દ્વિતીયોપનિષત્ ।

## તૃતીયોપનિષત્

સીતારામયોઃ મન્ત્રયન્ત્રાદિપૂજ્યત્વં
સીતારામૌ તન્મયાવત્ર પૂજ્યૌ જાતાન્યાભ્યાં ભુવનાનિ દ્વિસપ્ત ।
સ્થિતાનિ ચ પ્રહિતાન્યેવ તેષુ તતો રામો માનવો માયયાઽધાત્ ॥ ૧॥

જગત્પ્રાણાયાત્મનેઽસ્મૈ નમઃ સ્યાન્નમસ્ત્વૈક્યં પ્રવદેત્ પ્રાગ્ગુણેનેતિ ॥

ભગવત્પ્રસાદહેતુતયા મન્ત્રાદિરુક્તઃ, તત્ર પૂજ્યૌ કૌ? ઇત્યત આહ-સીતારામાવિતિ । આભ્યાં સીતારામાભ્યાં ચતુર્દશભુવનોપલક્ષિતાનન્તકોટિબ્રહ્માણ્ડાનિ જલાશયબુદ્બુદાનીવ મુહુર્મુહુઃ જન્મસ્થિતિભઙ્ગકલનામનુભવન્તિ । અત્ર યન્ત્રે તાવેવ તન્મયૌ યન્ત્રરૂપિણૌ સીતારામૌ પૂજ્યાવિત્યર્થઃ । તતો યો રામો માયયા માનવો ભૂત્વા સમસ્તં જગત્ અધાત્ અપોષયત્ અસ્મૈ જગત્પ્રાણાય જગદાત્મને નમઃ સ્યાત્ નમોઽસ્તુ, આવયોઃ ઐક્યમસ્ત્વિત્યર્થઃ । કુતો નમઃશબ્દસ્ત્વૈક્યવાચીત્યત આહ-“નમસ્તુ જીવપરયોર્વાચ્યાર્થત્યાગપૂર્વકમ્” લક્ષ્યયોઃ શુદ્ધત્વેન ઐક્યમેવ વદેત્ । કેન હેતુનેત્યત્ર જીવપરયોઃ પ્રાગ્ગુણેન સચ્ચિદાનન્દરૂપેણેત્યર્થઃ । ઇતિશબ્દસ્તૃતીયોપનિષત્સમાપ્ત્યર્થઃ ॥

ઇતિ તૃતીયોપનિષત્ ।

## ચતુર્થોપનિષત્

રામષડક્ષરાર્થઃ

જીવવાચી નમો નામ ચાત્મા રામેતિ ગીયતે ।
તદાત્મિકા યા ચતુર્થી તથા ચાયેતિ ગીયતે ॥ ૧॥

મન્ત્રોઽયં વાચકો રામો વાચ્યઃ સ્યાદ્યોગ એતયોઃ ।
ફલદશ્ચૈવ સર્વેષાં સાધકાનાં ન સંશયઃ ॥ ૨॥

યથા નામી વાચકેન નામ્નો યોઽભિમુખો ભવેત્ ।
તથા બીજાત્મકો મન્ત્રો મન્ત્રિણોઽભિમુખો ભવેત્ ॥ ૩॥

બીજશક્તિં ન્યસેદ્દક્ષવામયોઃ સ્તનયોરપિ ।
કીલો મધ્યે વિના ભાવ્યઃ સ્વવાઞ્છાવિનિયોગવાન્ ॥ ૪॥

સર્વેષામેવ મન્ત્રાણામેષ સાધારણઃ ક્રમઃ ।
અત્ર રામોઽનન્તરૂપસ્તેજસા વહ્નિના સમઃ ॥ ૫॥

સ ત્વનુષ્ણગુવિશ્વશ્ચેદગ્નીષોમાત્મકં જગત્ ।
ઉત્પન્નઃ સીતયા ભાતિ ચન્દ્રશ્ચન્દ્રિકયા યથા ॥ ૬॥

પ્રકૃત્યા સહિતઃ શ્યામઃ પીતવાસા જટાધરઃ ।
દ્વિભુજઃ કુણ્ડલી રત્નમાલી ધીરો ધનુર્ધરઃ ॥ ૭॥

પ્રસન્નવદનો જેતા ધૃષ્ટ્યષ્ટકવિભૂષિતઃ ।
પ્રકૃત્યા પરમેશ્વર્યા જગદ્યોન્યાઽઙ્કિતાઙ્કભૃત્ ॥ ૮॥

હેમાભયા દ્વિભુજયા સર્વાલઙ્કૃતયા ચિતા ।
શ્લિષ્ટઃ કમલધારિણ્યા પુષ્ટઃ કોસલજાઽઽત્મજઃ ॥ ૯॥

દક્ષિણે લક્ષ્મણેનાથ સધનુષ્પાણિના પુનઃ ।
હેમાભેનાનુજેનૈવ તથા કોણત્રયં ભવેત્ ॥ ૧૦॥

તથૈવ તસ્ય મન્ત્રસ્ય યશ્ચાણુશ્ચ સ્વઙેન્તયા ।
એવં ત્રિકોણરૂપં સ્યાત્તં દેવા યે સમાયયુઃ ॥ ૧૧॥

"નમસ્ત્વૈક્યં પ્રવદેત્" ઇત્યત્ર તત્ત્વમ્પદલક્ષ્યયોઃ ઐક્યં સૂત્રિતં, સોપાયં તત્પ્રપઞ્ચનાય ચતુર્થોપનિષદારભ્યતે । તત્રાદૌ શ્રીરામષડક્ષરાર્થકથનેન પ્રત્યક્પરૈક્યં પ્રકટયતિ-જીવેતિ । અસ્યાર્થઃ રામરહસ્યે પ્રપઞ્ચિતઃ ॥ ૧॥ એવં પ્રત્યક્પરૈક્યમુક્ત્વા મન્ત્રાર્થયોઃ એકત્વાનુસન્ધાનં પ્રત્યગ્બ્રહ્માવગત્યુપાય ઇત્યાહ-મન્ત્ર ઇતિ ॥ ૨॥ મન્ત્રો મન્ત્ર્યભિમુખો ભવેત્ ઇતિ સદૃષ્ટાન્તમાહ-યથેતિ ॥ ૩॥ મન્ત્રાનુષ્ઠાનસ્ય દેવતાઽઽભિમુખ્યહેતુતયા બીજાદિતન્ન્યાસસ્થલં ચ સર્વમન્ત્રસાધારણતયાઽઽહ-બીજેતિ ॥ ૪॥ રામસ્ય મન્ત્રાસનત્વં તત્રાવિર્ભવં ચાહ-અત્રેતિ । અત્ર મન્ત્રે તેજસા વહ્નિના સમઃ ॥ ૫॥ સ તુ સ એવ અનુષ્ણગુઃ ચન્દ્રસમઃ સ્વાભક્તભક્તાપેક્ષયા ઉષ્ણાનુષ્ણદ્યુતિત્વે અનુષ્ણગુરિતિ વક્તવ્યે વિસર્ગલોપશ્છાન્દસઃ । "હરિરેવ જગત્ જગદેવ હરિઃ હરિતો જગતો ન હિ ભિન્નતનુઃ" ઇતિ સ્મૃત્યનુરોધેન વિરાડ્ભાવમેત્ય વિશ્વરૂપશ્ચેત્ ઇદં જગત્ અગ્નીષોમાત્મકં ભવતિ । તત્ર પ્રાણ્યદૃષ્ટવશાત્ જગતિ સીતયા સહ ઉત્પન્નવત્ ભાતીત્યાહ-ઉત્પન્ન ઇતિ ॥ ૬-૭॥ ધૃષ્ટ્યષ્ટકવિભૂષિતઃ ધૃષ્ટ્યાદ્યષ્ટમન્ત્રિભિઃ પરિવૃત ઇત્યર્થઃ । પાર્શ્વદ્વયસ્થિતસીતાલક્ષ્મણાભ્યાં સ્થિતં ત્રિકોણવત્ ભાન્તં દેવાઃ સ્તુવન્તીત્યાહ-પ્રકૃત્યેતિ ॥ ૮-૧૦॥ યથા રામલક્ષ્મણસીતાસ્ત્રિકોણવત્ સ્થિતાઃ તથૈવ તસ્ય રામમન્ત્રસ્ય પાર્શ્વદ્વયે સ્વાપેક્ષયા લક્ષ્મણસ્ય કનીયસ્ત્વેન અણુત્વં "એષોઽણુરાત્મા" ઇતિ શ્રુતેઃ । યશ્ચ રામમનુઃ અણુશ્ચ લક્ષ્મણમનુઃ સ્વં સ્વકીયસીતામનુઃ સર્વે ઙેન્તયા ચતુર્થ્યન્તેન યુતાઃ એવં મન્ત્રરૂપેણાપિ ॥ ૧૧-૧૪॥

દેવકૃતરામસ્તુતિઃ

સ્તુતિં ચક્રુશ્ચ જગતઃ પતિં કલ્પતરૌ સ્થિતમ્ ।
કામરૂપાય રામાય નમો માયામયાય ચ ॥ ૧૨॥

નમો વેદાદિરૂપાય ઓઙ્કારાય નમો નમઃ ।
રમાધરાય રામાય શ્રીરામાયાત્મમૂર્તયે ॥ ૧૩॥

જાનકીદેહભૂષાય રક્ષોઘ્નાય શુભાઙ્ગિને ।
ભદ્રાય રઘુવીરાય દશાસ્યાન્તકરૂપિણે ॥ ૧૪॥

રામભદ્ર મહેષ્વાસ રઘુવીર નૃપોત્તમ ।
ભો દશાસ્યાન્તકાસ્માકં રક્ષાં દેહિ શ્રિયં ચ તે ॥ ૧૫॥

ત્વમીશ્વર્યા દાપયાથ સમ્પ્રત્યાશ્વરિમારણમ્ ।
કુર્વિતિ સ્તુત્ય દેવાદ્યાઃ તેન સાર્ધં સુખં સ્થિતાઃ ॥ ૧૬॥

રક્ષાં દેહિ શ્રિયં ચ તે ઉભે અપિ દેહીત્યર્થઃ ॥ ૧૫ ॥ ત્વં ઈશ્વર્યા સીતયા શ્રિયં દાપય । આશુ ઝટિતિ નઃ શત્રુમારણં કુરુ ॥ ૧૬ ॥

ઋષિકૃતરામસ્તુતિઃ

સ્તુવન્ત્યેવં હિ ઋષયસ્તદા રાવણ આસુરઃ ।
રામપત્નીં વનસ્થાં યઃ સ્વનિર્વૃત્યર્થમાદદે ॥ ૧૭ ॥

સ રાવણ ઇતિ ખ્યાતો યદ્વા રાવાચ્ચ રાવણઃ ।
તદ્વ્યાજેનેક્ષિતું સીતાં રામો લક્ષ્મણ એવ ચ ॥ ૧૮ ॥

વિચેરતુસ્તદા ભૂમૌ દેવીં સન્દૃશ્ય ચાસુરમ્ ।
હત્વા કબન્ધં શબરીં ગત્વા તસ્યાજ્ઞયા તયા ॥ ૧૯ ॥

પૂજિતો વાયુપુત્રેણ ભક્તેન ચ કપીશ્વરમ્ ।
આહૂય શંસતાં સર્વમાદ્યન્તં રામલક્ષ્મણૌ ॥ ૨૦ ॥

સ તુ રામે શઙ્કિતઃ સન્ પ્રત્યયાર્થં ચ દુન્દુભેઃ ।
વિગ્રહં દર્શયામાસ યો રામસ્તમચિક્ષિપત્ ॥ ૨૧ ॥

સપ્તસાલાન્ વિભિદ્યાશુ મોદતે રાઘવસ્તદા ।
તેન હૃષ્ટઃ કપીન્દ્રોઽસૌ સરામસ્તસ્ય પત્તનમ્ ॥ ૨૨ ॥

જગામાગર્જદનુજો વાલિનો વેગતો ગૃહાત્ ।
તદા વાલી નિર્જગામ તં વાલિનમથાહવે ॥ ૨૩ ॥

નિહત્ય રાઘવો રાજ્યે સુગ્રીવં સ્થાપયેત્તતઃ ।
હરીનાહૂય સુગ્રીવસ્ત્વાહ ચાશાવિદોઽધુના ॥ ૨૪ ॥

આદાય મૈથિલીમદ્ય દદતાશ્વાશુ ગચ્છત ।
તતસ્તતાર હનુમાનબ્ધિં લઙ્કાં સમાયયૌ ॥ ૨૫ ॥

સીતાં દૃષ્ટ્વાઽસુરાન્ હત્વા પુરં દગ્ધ્વા તથા સ્વયમ્ ।
આગત્ય રામેણ સહ ન્યવેદયત તત્ત્વતઃ ॥ ૨૬ ॥

તદા રામઃ ક્રોધરૂપી તાનાહૂયાથ વાનરાન્ ।
તૈઃ સાર્ધમાદાયાસ્ત્રાણિ પુરીં લઙ્કાં સમાયયૌ ॥ ૨૭ ॥

તાં દૃષ્ટ્વા તદધીશેન સાર્ધં યુદ્ધમકારયત્ ।
ઘટશ્રોત્રસહસ્રાક્ષજિદ્ભ્યાં યુક્તં તમાહવે ॥ ૨૮ ॥

હત્વા વિભીષણં તત્ર સ્થાપ્યાથ જનકાત્મજામ્ ।

આદાયાઙ્કસ્થિતાં કૃત્વા સ્વપુરં તૈર્જગામ સઃ ॥ ૨૯॥

યથા દેવાઃ સ્તુત્વા તત્પ્રસાદતઃ સ્વારાજ્યં યયુઃ તથા ઋષયોઽપિ તત્પ્રસાદલબ્ધદિવ્યજ્ઞાનેન ભાવિચર્યાં ભૂતરૂપાં વા પ્રપઞ્ચયન્તઃ સ્તુવન્તીત્યાહ-સ્તુવન્તીતિ । નિર્વૃતિઃ સુખં વૈકુણ્ઠપાર્ષદત્વપ્રભવં તદર્થમાદદે ઇત્યર્થઃ ॥ ૧૭॥ લોકાન્ રાવયતિ પીડયતિ કૈલાસપર્વતાક્રાન્તો મહારવં કરોતીતિ વા રાવણઃ । મત્પાર્ષદપ્રવરસ્ય બ્રાહ્મણશાપપ્રભવરાક્ષસત્વમોચનં કૃત્વા અયં સ્વપદે સ્થાપયિતવ્ય ઇતિ તદ્વ્યાજેન ॥ ૧૮॥ દેવીં સન્દૃશ્ય અન્વિષ્ય ॥ ૧૯-૨૯॥

પટ્ટાભિષિક્તરામચન્દ્રવિભૂતિઃ
તતઃ સિંહાસનસ્થઃ સન્ દ્વિભુજો રઘુનન્દનઃ ।
ધનુર્ધરઃ પ્રસન્નાત્મા સર્વાભરણભૂષિતઃ ॥ ૩૦॥

મુદ્રાં જ્ઞાનમયીં યામ્યે વામે તેજઃ પ્રકાશિનીમ્ ।
ધૃત્વા વ્યાખ્યાનનિરતશ્ચિન્મયઃ પરમેશ્વરઃ ॥ ૩૧॥

ઉદગ્દક્ષિણયોઃ સ્વસ્ય શત્રુઘ્નભરતૌ તતઃ ।
હનૂમન્તં ચ શ્રોતારમગ્રતઃ સ્યાત્ત્રિકોણગમ્ ॥ ૩૨॥

ભરતાધસ્તુ સુગ્રીવં શત્રુઘ્નાધો વિભીષણમ્ ।
પશ્ચિમે લક્ષ્મણં તસ્ય ધૃતચ્છત્રં સચામરમ્ ॥ ૩૩॥

તદધસ્તૌ તાલવૃન્તકરૌ ત્ર્યશ્રં પુનર્ભવેત્ ।
એવં ષટ્કોણમાદૌ સ્વદીર્ઘાઙ્ગૈરેષ સંયુતઃ ॥ ૩૪॥

દ્વિતીયં વાસુદેવાદ્યૈરાગ્નેયાદિષુ સંયુતઃ ।
તૃતીયં વાયુસૂનું ચ સુગ્રીવં ભરતં તથા ॥ ૩૫॥

વિભીષણં લક્ષ્મણં ચ અઙ્ગદં ચારિમર્દનમ્ ।
જામ્બવન્તં ચ તૈર્યુક્તસ્તતો ધૃષ્ટિર્જયન્તકઃ ॥ ૩૬॥

વિજયશ્ચ સુરાષ્ટ્રશ્ચ રાષ્ટ્રવર્ધન એવ ચ ।
અશોકો ધર્મપાલશ્ચ સુમન્ત્રશ્ચૈભિરાવૃતઃ ॥ ૩૭॥

તતઃ સહસ્રદૃગ્વહ્નિર્ધર્મક્ષો વરુણોઽનિલઃ ।
ઇન્દ્વીશધાત્રનન્તાશ્ચ દશભિશ્ચૈભિરાવૃતઃ ॥ ૩૮॥

બહિસ્તદાયુધૈઃ પૂજ્યો નીલાદિભિરલઙ્કૃતઃ ।
વસિષ્ઠવામદેવાદિમુનિભિઃ સમુપાસિતઃ ॥ ૩૯॥

પટ્ટાભિષિક્તરામચન્દ્રવિભૂતિં વક્ષ્યમાણયન્ત્રદશાવરણરૂપિણીં પ્રપઞ્ચયતિ-તત ઇતિ ॥ ૩૦-૩૩॥ શત્રુઘ્નભરતપવનજા આદ્યત્રિકોણરૂપાઃ સુગ્રીવવિભીષણલક્ષ્મણાસ્તુ દ્વિતીયત્રિકોણરૂપાઃ । શત્રુઘ્નભરતપવનજસુગ્રીવવિભીષણલક્ષ્મણાલઙ્કૃતરાજ્યાભિષિક્તશ્રીરામયન્ત્રષટ્કોણમધ્યે સાઙ્ગં સાવરણં સપરિવારં સસીતં રામચન્દ્રં ભાવયેત્ । કથમસૌ ભાવનીય ઇત્યત્ર સ્વયં ષટ્કોણમધ્યાસનો ભૂત્વા સીતાભરતશત્રુઘ્નહનૂમત્સુગ્રીવવિભીષણલક્ષ્મણૈઃ પરિવૃતો વિજયત ઇતિ ધ્યેયો ભવતિ । ષટ્કોણેષુ દીર્ઘાઙ્ગૈરેષ સંયુતઃ ઇત્યત્ર હૃદયાદ્યઙ્ગદેવતાભિરાવૃતો ધ્યેયઃ ॥ ૩૪॥ દ્વિતીયં વાસુદેવાદ્યૈઃ ઇત્યત્ર વાસુદેવસઙ્કર્ષણપ્રદ્યુમ્નાનિરુદ્ધૈઃ આવૃતો ભવતિ । તૃતીયં વાયુસૂનું ચ ઇત્યત્ર વાયુસૂન્વાદિજામ્બવદન્તૈઃ પરિવૃતો ભવતિ ॥ ૩૫॥ ચતુર્થાવરણે ધૃષ્ટ્યાદિસુમન્ત્રાન્તૈઃ આવૃતો ભવતિ ॥ ૩૬-૩૭॥ પઞ્ચમષષ્ઠયોઃ ઇન્દ્રાદિભિઃ તદાયુધૈશ્ચ આવૃતો ભવતિ ॥ ૩૮-૩૯॥

યન્ત્રલેખનપ્રકારઃ

એવમુદ્દેશતઃ પ્રોક્તં નિર્દેશસ્તસ્ય ચાધુના ।
ત્રિરેખાપુટમાલિખ્ય મધ્યે તારદ્વયં લિખેત્ ॥ ૪૦॥

તન્મધ્યે બીજમાલિખ્ય તદધઃ સાધ્યમાલિખેત્ ।
દ્વિતીયાન્તં ચ તસ્યોર્ધ્વં ષષ્ઠ્યન્તં સાધકં તથા ॥ ૪૧॥

કુરુ દ્વયં ચ તત્પાર્શ્વે લિખેદ્બીજાન્તરે રમામ્ ।
તત્ સર્વં પ્રણવાભ્યાં ચ વેષ્ટયેચ્છુદ્ધબુદ્ધિમાન્ ॥ ૪૨॥

દીર્ઘભાજી ષડશ્રેષુ લિખેદ્બીજં હૃદાદિભિઃ ।
કોણપાર્શ્વે રમામાયે તદગ્રેઽનઙ્ગમાલિખેત્ ॥ ૪૩॥

ક્રોધં કોણાગ્રાન્તરેષુ લિખ્ય મન્ત્ર્યભિતો ગિરમ્ ।
વૃત્તત્રયં સાષ્ટપત્રં સરોજે વિલિખેત્ સ્વરાન્ ॥ ૪૪॥

કેસરે ચાષ્ટપત્રે ચ વર્ગાષ્ટકમથાલિખેત્ ।
તેષુ માલામનોર્વર્ણાન્ વિલિખેદૂર્મિસઙ્ખ્યયા ॥ ૪૫॥

અન્તે પઞ્ચાક્ષરાણ્યેવં પુનરષ્ટદલં લિખેત્ ।
તેષુ નારાયણાષ્ટાર્ણાન્ લિખ્ય તત્કેસરે રમામ્ ॥ ૪૬॥

તદ્બહિર્દ્વાદશદલં વિલિખેદ્દ્વાદશાક્ષરમ્ ।
અથોન્નમો ભગવતે વાસુદેવાય ઇત્યયમ્ ॥ ૪૭॥

આદિક્ષાન્તાન્ કેસરેષુ વૃત્તાકારેણ સંલિખેત્ ।
તદ્બહિઃ ષોડશદલં લિખ્ય તત્કેસરે હ્રિયમ્ ॥ ૪૮॥

વર્માસ્ત્રનતિસંયુક્તં દલેષુ દ્વાદશાક્ષરમ્ ।

તત્સન્ધિષ્વિરજાદીનાં મન્ત્રાન્ મન્ત્રી સમાલિખેત્ ॥ ૪૯॥

હ્રૂં સ્રં ભ્રં વ્રં લ્રં અં શ્રં જ્રં (ચ)લિખેત્ સમ્યક્તતો બહિઃ ।
દ્વાત્રિંશારં મહાપદ્મં નાદબિન્દુસમાયુતમ્ ॥ ૫૦॥

વિલિખેન્મન્ત્રરાજાર્ણાન્ તેષુ પત્રેષુ યત્નતઃ ।
ધ્યાયેદષ્ટવસૂનેકાદશરુદ્રાંશ્ચ તત્ર વૈ ॥ ૫૧॥

દ્વાદશેનાંશ્ચ ધાતારં વષટ્કારં ચ તદ્બહિઃ ।
ભૂગૃહં વજ્રશૂલાઢ્યં રેખાત્રયસમન્વિતમ્ ॥ ૫૨॥

દ્વારોપેતં ચ રાશ્યાદિભૂષિતં ફણિસંયુતમ્ ।
અનન્તો વાસુકિશ્ચૈવ તક્ષઃ કાર્કોટપદ્મકઃ (કૌ) ॥ ૫૩॥

મહાપદ્મશ્ચ શઙ્ખશ્ચ ગુલિકોઽષ્ટૌ પ્રકીર્તિતાઃ ।
એવં મણ્ડલમાલિખ્ય તસ્ય દિક્ષુ વિદિક્ષુ ચ ॥ ૫૪॥

નારસિંહં ચ વારાહં લિખેન્મન્ત્રદ્વયં તથા ।
કૂટો રેફાનુગ્રહેન્દુનાદશક્ત્યાદિભિર્યુતઃ ॥ ૫૫॥

યો નૃસિંહઃ સમાખ્યાતો ગ્રહમારણકર્મણિ ।
અન્ત્યાર્ઘીશવિયદ્બિન્દુનાદૈર્બીજં ચ સૌકરમ્ ॥ ૫૬॥

હુઙ્કારં ચાત્ર રામસ્ય

અનુક્તાત્માદ્યાવરણચતુષ્ટયમત્રૈવાન્તર્ભૂયતે । એવમહરહઃ સ્વાવરણદેવતાતત્પરિવારૈઃ ઉપાસ્યમાનો વિજયત ઇત્યાદાવુદ્દેશતઃ પ્રોક્તમ્ । અધુના તુ યન્ત્રસ્વરૂપં નિર્દિશતિ-નિર્દેશસ્તસ્ય ચાધુનેતિ । યન્ત્રલેખનપ્રકારમાહ-ત્રિરેખેતિ ॥ ૪૦-૪૧॥ તત્સર્વં પ્રણવાભ્યાં ચ વેષ્ટયેચ્છુદ્ધબુદ્ધિમાન્ ઇત્યત્ર ન હિ પ્રણવચતુષ્ટયં લેખનીયં, મધ્યે સમ્મુખોન્મુખાભ્યાં તારદ્વયં લિખેદિતિ યદુક્તં તદેવ અત્ર પરામૃશ્યતે ॥ ૪૨॥ લિખેદ્બીજં હૃદાદિભિઃ રાં નમઃ ઇત્યાદિ ॥ ૪૩॥ ગિરં ઐં ઇતિ ॥ ૪૪॥ ન હિ “વૃત્તત્રયં સાષ્ટપત્રં” “પુનરષ્ટદળં લિખેત્” ઇત્યત્ર અષ્ટદળત્રયં ભવતિ, અષ્ટદલદ્વયસ્યૈવ વિનિયુક્તત્વાત્ । દ્વિતીયાષ્ટદળેષુ તેષુ ॥ ૪૫-૪૮॥ ઇરજાદીનાં હનૂમદાદીનામ્ ॥ ૪૯॥ નાદબિન્દુસમાયુતં ઇત્યત્ર મન્ત્રરાજઃ પ્રતિવર્ણં ૐ ગ્રાં ઇતિ દીર્ઘબિન્દુસમાયુતો યથા ભવતિ તથા દ્વાત્રિંશદ્દળેષુ મન્ત્રરાજાર્ણાન્ વિલિખેદિત્યર્થઃ ॥ ૫૦॥ તત્કેસરેષુ લિખિત્વા ધ્યાયેત્ ॥ ૫૧॥ દ્વાદશેનાંશ્ચ દ્વાદશાદિત્યાન્ । વસુરુદ્રાદિત્યનામાન્યાવરણપૂજાપ્રકરણે પ્રકાશ્યન્તે । વજ્રશૂલાઢ્યં વજ્રાદિશૂલાન્તાષ્ટદિક્પાલકાયુધાઢ્યમ્ । યદ્વા-પ્રતિદ્વારં વજ્રશૂલાભ્યાં આઢ્યમિતિ ॥ ૫૨-૫૪॥ કૂટઃ ક્ષકારઃ રેફશ્ચ અનુગ્રહઃ ઔકારશ્ચ ઇન્દુઃ મકારશ્ચ નાદશક્તિઃ યકારશ્ચ, આદિશબ્દેન બિન્દુર્ગૃહ્યતે, એતદ્વિશિષ્ટં ક્ષ્મ્ર્યૌં ઇતિ નિષ્પન્નમ્ ॥ ૫૫॥ અન્ત્યાર્ઘીશો વરાહઃ તસ્ય વાચકો વિયત્ હકારઃ બિન્દુનાદાભ્યાં બિન્દૂકારાભ્યાં યુક્તશ્ચેત્ હુમિતિ સૌકરબીજં ભવતિ । વરાહસ્ય અન્ત્યાર્ઘીશત્વં કથમિત્યત્ર ગુરુભારતોઽન્ત્યવિક્રિયામાપન્નાઽર્ઘિણી વસુમતી વરાહરૂપેણ તામુદ્ધૃત્યોદ્વાહં કૃતવાન્ ઇત્યન્ત્યાર્ઘીશો

ભૂવરાહ ઇત્યર્થઃ । તસ્ય બીજં હું ઇતિ । શિષ્ટં રામરહસ્યોપનિષત્પ્રોક્તદશાવરણયન્ત્રવ્યાખ્યાનેન વ્યાખ્યાતં સ્યાત્ । અનયોરેકરૂપત્વાત્ ન વિશેષોઽસ્તીત્યર્થઃ ॥ ૫૬ ॥

માલામન્ત્રોદ્ધારઃ

માલામન્ત્રોઽધુનેરિતઃ ।
તારો નતિશ્ચ નિદ્રાયાઃ સ્મૃતિર્મેદશ્ચ કામિકા ॥ ૫૭ ॥

રુદ્રેણ સંયુતા વહ્નિર્મેધામરવિભૂષિતા ।
દીર્ઘા ક્રૂરયુતા હ્લાદિન્યતો દીર્ઘસમાયુતા ॥ ૫૮ ॥

ક્ષુધા ક્રોધિન્યમોઘા ચ વિશ્વમપ્યથ મેધયા ।
યુક્તા દીર્ઘાજ્વાલિની ચ સુસૂક્ષ્મા મૃત્યુરૂપિણી ॥ ૫૯ ॥

સપ્રતિષ્ઠા હ્લાદિની ત્વક્ક્ષ્વેલપ્રીતિશ્ચ સામરા ।
જ્યોતિસ્તીક્ષ્ણાગ્નિસંયુક્તા શ્વેતાનુસ્વારસંયુતા ॥ ૬૦ ॥

કામિકાપઞ્ચમોલાન્તસ્તાન્તાન્તો થાન્ત ઇત્યથ ।
સ સાનન્તો દીર્ઘયુતો વાયુઃ સૂક્ષ્મયુતો વિષઃ ॥ ૬૧ ॥

કામિકા કામકા રુદ્રયુક્તાથોઽથ સ્થિરાતપા ।
તપિની દીર્ઘયુક્તા ભૂરનલોઽનન્તગોઽનિલઃ ॥ ૬૨ ॥

નારાયણાત્મકઃ કાલઃ પ્રાણોમ્ભો વિદ્યયા યુતઃ ।
પીતારાતિસ્તથા લાન્તો યોન્યા યુક્તસ્તતો નતિઃ ॥ ૬૩ ॥

સપ્તચત્વારિંશદ્વર્ણગુણાન્તઃ સ્રઙ્મનુઃ સ્વયમ્ ।
રાજ્યાભિષિક્તસ્ય તસ્ય રામસ્યોક્તક્રમાલ્લિખેત્ ॥ ૬૪ ॥

અથ માલામન્ત્રમુદ્ધરતિ-માલામન્ત્ર ઇતિ । ચતુષ્ષષ્ટિકલાસુ સપ્તચત્વારિંશત્કલાત્મકોઽયં માલામન્ત્રઃ કલાશાસ્ત્રે પ્રસિદ્ધઃ । એકૈકસ્યાઃ કલાયાઃ ઓમિત્યાદ્યૈકૈકો વર્ણઃ સઞ્જાતઃ ક્રમાદેવમૂહ્યમિતિ મત્વા ઉપરતમ્ । એવં તારાદિનત્યન્તકલાકાર્યપૂગો માલામનુર્ભવતિ । સ ચ રામરહસ્યોક્તઃ । એવં ૐ નમો ભગવતે રઘુનન્દનાય ઇત્યાદિ પ્રથમાષ્ટદલેષુ ક્રમાલ્લિખિત્વા પૂજયેદિત્યર્થઃ ॥ ૫૭-૬૪ ॥

યન્ત્રસ્તુતિઃ

ઇદં સર્વાત્મકં યન્ત્રં પ્રાગુક્તમૃષિસેવિતમ્ ।
સેવકાનાં મોક્ષકરમાયુરારોગ્યવર્ધનમ્ ॥ ૬૫ ॥

અપુત્રાણાં પુત્રદં ચ બહુના કિમનેન વૈ ।
પ્રાપ્નુવન્તિ ક્ષણાત્ સમ્યગત્ર ધર્માદિકાનપિ ॥ ૬૬ ॥

ઇદં રહસ્યં પરમમીશ્વરેણાપિ દુર્ગમમ્ ।
ઇદં યન્ત્રં સમાખ્યાતં ન દેયં પ્રાકૃતે જને ॥ ઇતિ ॥ ૬૭॥

ઉક્તવિશેષણવિશિષ્ટં યન્ત્રં સ્તૌતિ-ઇદમિતિ । ભજનાનુરૂપફલદમેતદિત્યાહ-સેવકાનામિતિ । ચતુર્વિધપુરુષાર્થસાધકમેતદેવેત્યર્થઃ ॥ ૬૫-૬૬॥ એતસ્ય કૈવલ્યપ્રાપકજ્ઞાનસાધનત્વેન યથોક્તસાધનવિકલેષુ ગોપનીયત્વમાહ-ઇદમિતિ । ઈશ્વરેણ સર્વતન્ત્રસ્વતન્ત્રેણ પણ્ડિતેનાપિ કામનાધિયા મુખ્યફલમાત્તું દુઃશકમિત્યર્થઃ । ઇતિશબ્દસ્તુરીયોપનિષત્સમાપ્ત્યર્થઃ ॥ ૬૭॥

ઇતિ ચતુર્થોપનિષત્ ।

## પઞ્ચમોપનિષત્

ભૂતશુદ્ધ્યાદિપીઠાર્ચનાન્તપૂજા
ભૂતાદિકં શોધયેદ્વારપૂજાં કૃત્વા પદ્માદ્યાસનસ્થઃ પ્રસન્નઃ ।
અર્ચાવિધાવસ્ય પીઠાધરોર્ધ્વપાર્શ્વાર્ચનં મધ્યપદ્માર્ચનં ચ ॥ ૧॥

કૃત્વા મૃદુશ્લક્ષ્ણસુતૂલિકાયાં રત્નાસને દેશિકમર્ચયિત્વા ।
શક્તિં ચાધારાખ્યકાં કૂર્મનાગૌ પૃથિવ્યબ્જે સ્વાસનાધઃ પ્રકલ્પ્ય ॥

વિઘ્નેશં દુર્ગાં ક્ષેત્રપાલં ચ વાણીં બીજાદિકાંશ્ચાગ્નિદેશાદિકાંશ્ચ ।
પીઠસ્યાઙ્ઘ્રિષ્વેષ ધર્માદિકાંશ્ચ નઞ્પૂર્વાંસ્તાંસ્તત્તદ્દિક્ષ્વર્ચયેચ્ચ ॥ ૩॥

મધ્યે ક્રમાદર્કવિધ્વગ્નિતેજાંસ્યુપર્યુપર્યાદિમૈરર્ચિતાનિ ।
રજઃ સત્ત્વં તમ એતાનિ વૃત્તત્રયં બીજાઢ્યં ક્રમાદ્ભાવયેચ્ચ ॥ ૪॥

આશાવ્યાશાસ્વપ્યથાત્માનમન્તરાત્માનં વા પરમાત્માનમન્તઃ ।
જ્ઞાનાત્માનં ચાર્ચયેત્તસ્ય દિક્ષુ માયાવિદ્યે યે કલા(એકલ?) પારતત્ત્વે ॥ ૫॥

સમ્પૂજયેદ્વિમલાદીશ્ચ શક્તીઃ

રાજ્યાભિષિક્તશ્રીરામચન્દ્રપૂજાયન્ત્રં પ્રકટયિત્વા તત્પીઠાવરણપૂજાં તત્ફલં ચ પ્રપઞ્ચયિતું પઞ્ચમોપનિષદારભ્યતે-ભૂતાદિકમિતિ । ભૂતાદિકં શોધયેત્ ઇત્યત્ર બ્રાહ્મે મુહૂર્તે મુમુક્ષુરુત્થાય દન્તધાવનસ્નાનાદિસ્વાશ્રમોચિતકર્મ નિર્વર્ત્યાથ યથાસમ્ભવં પૂજાદ્રવ્યાણિ સમ્પાદ્ય દેવગૃહં ગત્વા પ્રદક્ષિણનમસ્કારાન્ વિધાય દેવોદ્બોધનાર્થં આદૌ ઘણ્ટાનાદં કૃત્વા પૃથ્વી ત્વયેતિ ભૂશુદ્ધિં અપસર્પન્ત્વિતિ ભૂતશુદ્ધિં પૃથિવ્યાદિપઞ્ચભૂતભૌતિકાનાં કારણમાત્રાવશેષચિન્તનમેવ વા ભૂતશુદ્ધિં કૃત્વા । આદિશબ્દેન કલશશઙ્ખપૂજાઽઽદિકં ગૃહ્યતે । આસનમન્ત્રસ્યેત્યાદિના કુશાદ્યાસનમભિમન્ત્ર્ય સોઽહમર્ક ઇતિ મન્ત્રેણ દેવોભયપાર્શ્વયોઃ દીપં સંસ્થાપ્ય સ્વયં ઉત્તરાભિમુખઃ પદ્માદ્યાસનમાસ્થાય પ્રાણાયામાદિકં કૃત્વા સ્વવામભાગે કલશં દક્ષિણભાગે શઙ્ખં યથોક્તવિધિના અભ્યર્ચ્ય શઙ્ખોદકેન દેવાત્માનૌ પૂજોપકરણાનિ સમ્પ્રોક્ષ્ય કલશે કિઞ્ચિત્ નિક્ષિપ્ય તચ્છેષં પરિત્યજેત્ ।

સ્વપુરોભાગે પાદ્યાદિપઞ્ચપાત્રાણિ ચાસાદ્ય ગન્ધોદકેન પૂરયિત્વા તત્ર સાવરણં દેવં આવાહનાદિભિઃ અભ્યર્ચ્ય । દ્વારપૂજાં કૃત્વેત્યાદિના-અધરભાગાય નમઃ । ઊર્ધ્વભાગાય નમઃ । પાર્શ્વાય નમઃ । દક્ષિણપાર્શ્વાય નમઃ । પશ્ચિમપાર્શ્વાય નમઃ । ઉત્તરપાર્શ્વાય નમઃ । પીઠમધ્યગતકમલાય નમઃ ॥ ૧॥ પીઠદક્ષિણભાગે દેશિકાય નમઃ । આદિકૂર્માય નમઃ । શેષાય નમઃ । પૃથિવ્યૈ નમઃ । કમલાય નમઃ ॥ ૨॥ વિઘ્નેશં દુર્ગાં ઇત્યાદિના-ગં ગણપતયે નમઃ । દું દુર્ગાયૈ નમઃ । ક્ષં ક્ષેત્રપાલકાય નમઃ । સં સરસ્વત્યૈ નમઃ । મૂલપ્રકૃત્યૈ નમઃ । ક્ષીરસમુદ્રાય નમઃ । રત્નદ્વીપાય નમઃ । રત્નસિંહાસનાય નમઃ । શ્વેતચ્છત્રાય નમઃ । રત્નમણ્ટપાય નમઃ । કલ્પકવૃક્ષાય નમઃ । ધર્માદિકાંશ્ચેત્યાદિના-ધર્માય નમઃ । જ્ઞાનાય નમઃ । વૈરાગ્યાય નમઃ । ઐશ્વર્યાય નમઃ । અધર્માય નમઃ । અજ્ઞાનાય નમઃ । અવૈરાગ્યાય નમઃ । અનૈશ્વર્યાય નમઃ ॥ ૩॥ અર્કાય નમઃ । સોમાય નમઃ । અગ્નયે નમઃ । રજસ્સત્ત્વમિત્યાદિના-રજસે નમઃ । સત્વાય નમઃ । તમસે નમઃ ॥ ૪॥ આત્મને નમઃ । અન્તરાત્મને નમઃ । પરમાત્મને નમઃ । જ્ઞાનાત્મને નમઃ । માયાવિદ્યા ઇત્યાદિના-માયાતત્ત્વાય નમઃ । વિદ્યાતત્ત્વાય નમઃ । એકલ(કલા?)તત્વાય નમઃ । પરશિવતત્ત્વાય નમઃ । માયાયૈ નમઃ । વિદ્યાયૈ નમઃ । અનન્તાયૈ નમઃ । પદ્માયૈ નમઃ । જ્ઞાનાત્મને નમઃ ॥ ૫॥ વિમલાદીશ્ચ શક્તીઃ ઇત્યાદિના-વિમલાયૈ નમઃ । ઉત્કર્ષણ્યૈ નમઃ । જ્ઞાનાયૈ નમઃ । ક્રિયાયૈ નમઃ । યોગાયૈ નમઃ । પ્રહ્વ્યૈ નમઃ । સત્યાયૈ નમઃ । ઈશાનાયૈ નમઃ । મધ્યે અનુગ્રહાયૈ નમઃ । ૐ નમો ભગવતે વિષ્ણવે વાસુદેવાય સર્વાત્મસંયોગયોગપીઠાય નમઃ ઇતિ પીઠાર્ચનં કુર્યાત્ ॥

ભગવદ્ધ્યાનપુરસ્સરમાવરણપૂજા

અભ્યર્ચયેદ્દેવમાવાહયેચ્ચ ।
અઙ્ગવ્યૂહાનિલજાદ્યૈશ્ચ પૂજ્ય ધૃષ્ટ્યાદિકૈર્લોકપાલૈસ્તદસ્ત્રૈઃ ॥ ૬॥

વસિષ્ઠાદ્યૈર્મુનિભિર્નીલમુખ્યૈરારાધયેદ્રાઘવં ચન્દનાદ્યૈઃ ।
મુખ્યોપહારૈર્વિવિધૈશ્ચ પૂજ્યૈસ્તસ્મૈ જપાદીંશ્ચ સમ્યક્ પ્રકલ્પ્ય ॥ ૭॥

અથ ભગવદ્ધ્યાનપુરસ્સરં આવરણપૂજાં કુર્યાદિત્યાહ-દેવમિતિ । દેવમાવાહયેચ્ચ ઇત્યત્ર ષટ્કોણમધ્યે સિંહાસનસ્થાય દ્વિભુજાય પાર્શ્વદ્વયસ્થિતધનુર્બાણાય દક્ષિણકરધૃતજ્ઞાનમુદ્રાય હનૂમદાદિવ્યાખ્યાનનિરતાય સ્વવામાઙ્કાલઙ્કાર-સીતાય રાજ્યાભિષિક્તશ્રીરામચન્દ્રાય નમઃ, ષટ્કોણમધ્યે સીતાભરતશત્રુઘ્ન-હનૂમત્સુગ્રીવવિભીષણલક્ષ્મણા શ્રીરામાય નમઃ ઇતિ પૂજયેત્ । ષટ્કોણેષુ રાં હૃદયાય નમઃ ઇત્યાદિ રઃ અસ્ત્રાય ફટ્ ઇત્યન્તાઙ્ગાદ્યઞ્ચિતાય શ્રીરામાય નમઃ ઇતિ પૂજયેત્ । પ્રથમાષ્ટદળનૂલેષુ આગ્નેયાદિક્રમેણ આત્માન્તરાત્મપરમાત્મજ્ઞાનાત્મભિઃ પૂર્વાદિક્રમેણ નિવૃત્તિપ્રતિષ્ઠાવિદ્યાશ્રીભિશ્ચાવૃતાય શ્રીરામાય નમઃ । પ્રથમાષ્ટદળાગ્રેષ્વાગ્નેયાદિક્રમેણ વાસુદેવસઙ્કર્ષણપ્રદ્યુમ્નાનિરુદ્ધૈઃ પૂર્વાદિક્રમેણ શ્રીકીર્તિપુષ્ટિરતિભિશ્ચાવૃતાય શ્રીરામાય નમઃ । દ્વિતીયાષ્ટદળનૂલેષુ પૂર્વાદિક્રમેણ વાયુસૂનુસુગ્રીવ-ભરતવિભીષણલક્ષ્મણાઙ્ગદશત્રુઘ્નજામ્બવદ્ભિઃ આવૃતાય શ્રીરામાય નમઃ । દ્વિતીયાષ્ટદળાગ્રેષુ પૂર્વાદિક્રમેણ ધૃષ્ટિજયન્તવિજયસુરાષ્ટ્રરાષ્ટ્રવર્ધનાશોકધર્મપાલસુમન્ત્રૈરાવૃતાય શ્રીરામાય નમઃ । ધૃષ્ટ્યાદિકૈરિત્યાદિશબ્દેન વસિષ્ઠનીલાદ્યાવરણાનિ ગૃહ્યન્તે । તદ્યથા-મૂલે તાવદિન્દ્રવજાદ્યાવરણાનન્તરં વસિષ્ઠનીલાદ્યાવરણયોઃ ઉક્તત્વેઽપિ તદપેક્ષયા અર્થક્રમસ્ય બલીયસ્ત્વાત્ રામરહસ્યેઽપિ અર્થક્રમાનુસારેણૈવ પ્રપઞ્ચિતત્વાત્ અત્રાપિ તથૈવ યુજ્યત ઇતિ ॥ ૬॥ દ્વાદશદળેષુ પૂર્વાદિક્રમેણ વસિષ્ઠાય નમઃ । વામદેવાય

નમઃ । ઇત્યાદિવસિષ્ઠવામદેવજાબાલિગૌતમભરદ્વાજવિશ્વામિત્રવાલ્મીકિનારદસનકસનન્દનસનત્કુમારૈઃ આવૃતાય શ્રીરામાય નમઃ । ષોડશદલેષુ નીલનળસુષેણમૈન્દદ્વિવિદશરભગન્ધમાદનગવાક્ષકિરીટકુણ્ડલશ્રી-વત્સકૌસ્તુભશઙ્ખચક્રગદાપદ્મૈરાવૃતાય શ્રીરામાય નમઃ । દ્વાત્રિંશદ્દલેષુ ધ્રુવાય નમઃ ઇત્યાદિ ધ્રુવસોમાપાહૃયાનિલાનલપ્રત્યૂષપ્રભ વીરભદ્રશમ્ભુગિરીશાજૈક-પદાહિર્બુધ્ન્યપિનાકિભુવનેશકપાલિદિક્પતિસ્થાણુભગૈઃ એકાદશરુદ્રૈઃ-પ્રાતિસ્વિકાર્ચનાયાં અજાયૈકપદે નમઃ, અહયે બુધ્ન્યાય નમ ઇતિ । વરુણસૂર્યવેદાઙ્ગભાન્વિન્દ્રકવિગભસ્તિમયહિરણ્યરેતોદિવાકરમિત્રવિષ્ણુભિઃ ધાત્રા ચાવૃતાય શ્રીરામાય નમઃ । ભૂપુરાન્તઃ ઇન્દ્રાગ્નિયમનિરૃતિવરુણવાયુકુબેરેશાનૈઃ અષ્ટદિક્પાલકૈઃ ઊર્ધ્વાધોભાગે ધાત્રનન્તાભ્યાં ચાવૃતાય શ્રીરામાય નમઃ । ભૂપુરાદ્બહિઃ વજ્રશક્તિદણ્ડખડ્ગપાશાઙ્કુશગદાશૂલપદ્મચક્રૈરાવૃતાય શ્રીરામાય નમઃ । એવં સાઙ્ગાવરણં દેવં વ્યષ્ટિસમષ્ટિભેદેન ષોડશોપચારૈરભ્યર્ચ્ય તત્સન્નિધૌ ષટ્સહસ્રસઙ્ખ્યયા રામતારકમન્ત્રં જપિત્વા ગાયત્રીમાલાલક્ષ્મણાદિમન્ત્રાંશ્ચ જપિત્વા જપાદિકં ભગવતિ સમર્પ્ય તતો દેવં હૃદય ઉદ્વાસ્ય તન્નિવેદિતાન્નં બ્રાહ્મણમુક્તાવશિષ્ટં સ્વયમપિ ભુક્ત્વા શિષ્ટકાલં ભગવન્નામસ્મૃતિતઃ કાલં નયેત્ ॥ ૭॥

ભગવત્પ્રસાદદ્વારા મોક્ષપ્રાપ્તિઃ
એવમ્ભૂતં જગદાધારભૂતં રામં વન્દે સચ્ચિદાનન્દરૂપમ્ ।
ગદાઽરિશઙ્ખાબ્જધરં ભવારિં સ યો ધ્યાયેન્મોક્ષમાપ્નોતિ સર્વઃ ॥ ૮॥

વિશ્વવ્યાપી રાઘવો યસ્તદાનીમન્તર્દધે શઙ્ખચક્રે ગદાબ્જે ।
ધૃત્વા રમાસહિતઃ સાનુજશ્ચ સપત્તનઃ સાનુગઃ સર્વલોકી ॥ ૯॥

તદ્ભક્તા યે લબ્ધકામાંશ્ચ ભુક્ત્વા તથા પદં પરમં યાન્તિ તે ચ ।
ઇમા ઋચઃ સર્વકામાર્થદાશ્ચ યે તે પઠન્ત્યમલા યાન્તિ મોક્ષમ્ ॥ ૧૦॥

એવં કૃતે ઝટિતિ ભગવત્પ્રસાદો ભવતિ, તતઃ ચિત્તશુદ્ધિઃ, તતો નિર્વિશેષબ્રહ્મજ્ઞાનં, તત્સમકાલં કૃતકૃત્યો ભવતીત્યાહ-એવમિતિ । સ્વોપાસકદૃષ્ટ્યપેક્ષયા એવમ્ભૂતં યન્ત્રરૂપેણ મૂર્તિરૂપેણ સર્વારોપાધારરૂપેણ ચ સિદ્ધત્વાત્ જગદાધારભૂતં વસ્તુતઃ સ્વેન રૂપેણ રાજતે મહીયતે ઇતિ રામં વન્દે સચ્ચિદાનન્દરૂપં ગદાઽરિશઙ્ખાબ્જધરં ભવારિં વા રામં યો ધ્યાયેત્ સોઽયં તત્પ્રસાદલબ્ધજ્ઞાનદ્વારા મોક્ષપ્રાપ્નોતિ ॥ ૮॥ સ્વોપાસકમોક્ષદશાયાં તદુપાસ્યો રામઃ કેન રૂપેણ અવશિષ્યત ઇત્યત આહ-વિશ્વેતિ । સ્વપ્રસાદતઃ સ્વોપાસકસ્વાજ્ઞાનનિવૃત્તિસમકાલમેવ રામચન્દ્રો ભગવાન્ સ્વકરકલિતશઙ્ખચક્રે ગદાઽબ્જે ચ ઉપસંહૃત્ય સાનુજઃ સપત્તનોઽયં નિર્વિશેષભાવં ધૃત્વા અન્તર્દધે તતો વ્યાપ્યવિશ્વસત્ત્વે વિશ્વવ્યાપી ભવતિ તદભાવે તન્મોક્ષરૂપેણ અવશિષ્યત ઇત્યર્થઃ ॥ ૯॥ એકસ્ય મોક્ષતો ભગવદભાવે તદ્ભક્તાનાં કા ગતિરિત્યાશઙ્ક્ય સ્વદૃષ્ટ્યા ભગવાનસ્તીત્યુપાસ્ય તત્પ્રસાદતઃ કૃતકૃત્યાઃ ભવન્તીત્યાહ-તદ્ભક્તા ઇતિ । સર્વાર્થસાધકમન્ત્રપારાયણફલમાહ-ઇમા ઇતિ ॥ ૧૦॥

ઇતિ પઞ્ચમોપનિષત્ ।

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## શ્રીરામૌત્તરતાપિની ઉપનિષત્

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

### પ્રથમઃ ખણ્ડઃ

અવિમુક્તોપાસનં

બૃહસ્પતિરુવાચ યાજ્ઞવલ્ક્યમ્-યદનુ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ ॥ ૧॥

અવિમુક્તં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । તસ્માદ્યત્ર ક્વચન ગચ્છતિ તદેવ મન્યેતેતીદં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । અત્ર હિ જન્તોઃ પ્રાણેષૂત્ક્રમમાણેષુ રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે યેનાસાવમૃતી ભૂત્વા મોક્ષી ભવતિ । તસ્માદવિમુક્તમેવ નિષેવેત । અવિમુક્તં ન વિમુઞ્ચેત્ ॥ ૨॥
એવમેવૈતદ્યાજ્ઞવલ્ક્ય ॥ ૩॥

પૂર્વતાપિનીરીત્યોપાસકાનાં નિર્વિશેષબ્રહ્માવગતયે ઉત્તરતાપિન્યુપનિષદારભ્યતે । બૃહસ્પતિભરદ્વાજાત્રિયાજ્ઞવલ્ક્યપ્રશ્નપ્રતિવ
નિર્વિશેષબ્રહ્મવિદ્યાસ્તુત્યર્થા । તત્રાવિમુક્તયાથાત્મ્યબુભુત્સયા યાજ્ઞવલ્ક્યં પ્રતિ બૃહસ્પતિરુવાચેત્યાહ-બૃહસ્પતિરિતિ ॥ ૧॥ બ્રહ્મમાત્રજ્ઞાનોત્પત્તેઃ પ્રાક્ અવિમુક્તં ભ્રૂમધ્યવિલસિતતારકલક્ષ્યમેવ નિષેવેત સદા અનુસન્ધાનં કુર્યાદિતિ । શિષ્ટં જાબાલોપનિષદ્ગતપ્રથમખણ્ડવ્યાખ્યાનેનૈવ વ્યાખ્યાતં સ્યાત્૧॥ ૨-૩॥

ઇતિ પ્રથમઃ ખણ્ડઃ ।

### દ્વિતીયઃ ખણ્ડઃ

રામષડક્ષરસ્ય તારકત્વં

અથ હૈનં ભરદ્વાજઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં-કિં તારકં કિં તારયતીતિ ॥ ૧॥

સ હોવાચ યાજ્ઞવલ્ક્યઃ-તારકં દીર્ઘાનલં બિન્દુપૂર્વકં દીર્ઘાનલં પુનર્માય નમશ્ચન્દ્રાય નમો ભદ્રાય નમ ઇત્યેતદ્બ્રહ્માત્મકાઃ સચ્ચિદાનન્દાખ્યા ઇત્યુપાસિતવ્યમ્ ॥ ૨॥

અકારઃ પ્રથમાક્ષરો ભવતિ । ઉકારો દ્વિતીયાક્ષરો ભવતિ । મકારસ્તૃતીયાક્ષરો ભવતિ । અર્ધમાત્રશ્ચતુર્થાક્ષરો ભવતિ । બિન્દુઃ પઞ્ચમાક્ષરો ભવતિ । નાદઃ ષષ્ઠાક્ષરો ભવતિ । તારકત્વાત્તારકો ભવતિ । તદેવ તારકં બ્રહ્મ ત્વં વિદ્ધિ । તદેવોપાસિતવ્યમિતિ જ્ઞેયમ્ । ગર્ભજન્મજરામરણસંસારમહદ્ભયાત્ સન્તારયતીતિ । તસ્માદુચ્યતે ષડક્ષરં તારકમિતિ ॥ ૩॥

પ્રથમખણ્ડે રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે, અવિમુક્તમેવ પ્રત્યઞ્ચમાત્માનમેવ નિષેવેત, તત્ બ્રહ્મમાત્રજ્ઞાનં ન મુઞ્ચેદિતિ યાજ્ઞવલ્ક્યોક્તિ બૃહસ્પતિના સાકં ભરદ્વાજોઽપિ નિશમ્ય અવિમુક્તશબ્દવાચ્યતારકેયત્તાપરિજ્ઞાનાય ભરદ્વાજો યાજ્ઞવલ્ક્યં પૃચ્છતીત્યાહ-અથેતિ । કિમિતિ? કિં તારકં કિં તારયતીતિ ॥ ૧॥ ભરદ્વાજપ્રશ્નોત્તરં યાજ્ઞવલ્ક્યઃ એવમાહ-તારકમિતિ । આદૌ બિન્દુપૂર્વકં દીર્ઘાનલં રામિતિ તતો દીર્ઘાનલં રેતિ પુનર્માય નમ ઇતિ સર્વં મિળિત્વા રાં રામાય નમઃ ઇતિ રામષડક્ષર ઉદ્ધૃતો ભવતિ । રાં રામેતિ ત્ર્યક્ષરેણ સહ ચન્દ્રાય નમઃ ઇત્યાદિપઞ્ચાક્ષરયોજનાત્ રાં રામચન્દ્રાય નમઃ રાં રામભદ્રાય નમઃ ઇત્યષ્ટાક્ષરો ભવતિ । ઇત્યેતત્ એતે બ્રહ્માત્મકાઃ સચ્ચિદાનન્દાખ્યાઃ ઇત્યુપાસિતવ્યમ્ ॥ ૨॥ પ્રણવસ્ય તારકત્વપ્રસિદ્ધેઃ ષડક્ષરસ્ય તારકત્વં કથં? ઇત્યત આહ-અકાર ઇતિ યસ્માદેવં તસ્માત્ ॥ ૩॥

તારકજપફલં

ય એતત્તારકં બ્રહ્મ બ્રાહ્મણો નિત્યમધીતે સ પાપ્માનં તરતિ સ મૃત્યું તરતિ સ બ્રહ્મહત્યાં તરતિ સ ભ્રૂણહત્યાં તરતિ સ વીરહત્યાં તરતિ સ સર્વહત્યાં તરતિ સ સંસારં તરતિ સ સર્વં તરતિ સોઽવિમુક્તમાશ્રિતો ભવતિ સ મહાન્ ભવતિ સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૪॥

તારકજપફલમાહ-ય ઇતિ । તારકાર્થજ્ઞાનાત્ મુખ્યામૃતત્વમેતીત્યર્થઃ ॥ ૪॥

રામસ્ય પ્રણવાર્થત્વં

અત્રૈતે શ્લોકા ભવન્તિ-

અકારાક્ષરસમ્ભૂતઃ સૌમિત્રિર્વિશ્વભાવનઃ ।
ઉકારાક્ષરસમ્ભૂતઃ શત્રુઘ્નસ્તૈજસાત્મકઃ ॥ ૫॥

પ્રાજ્ઞાત્મકસ્તુ ભરતો મકારાક્ષરસમ્ભવઃ ।
અર્ધમાત્રાત્મકો રામો બ્રહ્માનન્દૈકવિગ્રહઃ ॥ ૬॥

શ્રીરામસાન્નિધ્યવશાજ્જગદાધારકારિણી ।
ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્ ॥ ૭॥

સા સીતા ભવતિ જ્ઞેયા મૂલપ્રકૃતિસંજ્ઞિકા ।
પ્રણવત્વાત્ પ્રકૃતિરિતિ વદન્તિ બ્રહ્મવાદિનઃ ॥ ઇતિ ॥ ૮॥

રામતારકસ્ય પ્રણવત્વે શ્રીરામસ્ય પ્રણવાર્થત્વં કુતઃ? ઇત્યત્ર અસ્મિન્નર્થે એતે શ્લોકાઃ મન્ત્રાઃ ભવન્તીત્યાહ-અત્રૈતે શ્લોકા ભવન્તીતિ । સૌમિત્ર્યાદેઃ અકારાદ્યર્ધમાત્રાઽન્તકલનાઽઽરોપાપવાદાધિકરણતયા વિશ્વવિરાડોત્રાદિદ્વિ(?)તુર્યાવિકલ્પરૂપત્વાત્ શ્રીરામસ્ય પ્રણવાર્થત્વમુપપદ્યતે ॥ ૫-૬॥ તસ્ય પ્રણવાર્થત્વમસ્તુ, પ્રણવસ્વરૂપં કિં? ઇત્યત આહ-શ્રીરામેતિ । સ્વાધિષ્ઠેયચિત્સામાન્યરૂપાયાઃ સીતાયાઃ સ્વાધિષ્ઠાનસત્તાસામાન્યશ્રીરામાવિનાભા
પ્રકૃતત્વાત્ સીતાયાઃ પ્રણવત્વં સિદ્ધમિત્યર્થઃ ॥ ૭-૮॥

પ્રણવતદર્થયાથાત્મ્યં

ઓમિત્યેતદક્ષરમિદં સર્વં તસ્યોપવ્યાખ્યાનં ભૂતં ભવ્યં ભવિષ્યદિતિ સર્વમોઙ્કાર એવ । યચ્ચાન્યત્રિકાલાતીતં તદપ્યોઙ્કાર એવ । સર્વં હ્યેતદ્બ્રહ્મ । અયમાત્મા બ્રહ્મ । સોઽયમાત્મા ચતુષ્પાત્ ॥ ૯॥

જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ સ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ ॥ ૧૦॥

સ્વપ્નસ્થાનોઽન્તઃપ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિવિક્તભુક્ તૈજસો દ્વિતીયઃ પાદઃ ॥ ૧૧॥

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ તત્ સુષુપ્તમ્ । સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘન એવાનન્દમયો હ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદઃ ॥ ૧૨॥

એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનામ્ ॥ ૧૩॥

નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન પ્રજ્ઞં નાપ્રજ્ઞં ન પ્રજ્ઞાનઘનમદૃશ્યમવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમવ્યપદેશ્યમેકાત્મ
પ્રપઞ્ચોપશમં શાન્તં શિવમદ્વૈતં ચતુર્થં મન્યન્તે સ આત્મા સ વિજ્ઞેયઃ ॥ ૧૪॥

કો વા પ્રણવઃ કો વા પ્રણવાર્થઃ, ઇત્યાકાઙ્ક્ષાયાં અભિધાનપ્રણવાભિધેયતદર્થૈકત્વાવગતયે પ્રણવતદર્થયાથાત્મ્યં પ્રકટયતિ-ઓમિતિ । સ આત્મા સ વિજ્ઞેયઃ ઇત્યેતત્ સર્વં માણ્ડૂક્યોપનિષદ્વ્યાખ્યાનેનૈવ પદશો વ્યાખ્યાતં સ્યાત્ ઇતિ મન્તવ્યમ્ ॥ ૯-૧૪॥

પ્રત્યગ્બ્રહ્મણોરેકીકરણં

સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મબન્ધહરઃ સર્વદા દ્વૈતરહિત આનન્દરૂપઃ સર્વાધિષ્ઠાનસન્માત્રો નિરસ્તાવિદ્યાતમોમોહોઽહમેવેતિ સમ્ભાવ્યોઽહમ્ ॥ ૧૫॥

ૐ તત્ સદ્યત્ પરં બ્રહ્મ રામચન્દ્રશ્ચિદાત્મકઃ ।
સોઽહમોન્તદ્રામભદ્રપરઞ્જ્યોતી રસોઽહમોમ્ ॥ ૧૬॥

ઇત્યાત્માનમાદાય મનસા બ્રહ્મણૈકીકુર્યાત્ ॥ ૧૭॥

કિમિત્યયં વિજ્ઞેયઃ ઇત્યાકાઙ્ક્ષાયાં અપરોક્ષતયા જ્ઞાતવ્યઃ ઇત્યાહ-સદેતિ । પ્રત્યગ્રૂપેણ સદોજ્જ્વલતીતિ સદોજ્જ્વલઃ । સ્વાવિદ્યાતત્કાર્યસ્વાત્મબન્ધવતઃ સદોજ્જ્વલત્વં કુત ઇત્યત આહ-અવિદ્યેતિ । વસ્તુદૃષ્ટ્યા યા અવિદ્યમાના સા અવિદ્યા, તત્કાર્યં અનન્તકોટિબ્રહ્માણ્ડજાતં, તત્કલનાવિરળઃ તદ્ધીનઃ, આવિદ્યકં સ્વાત્મબન્ધં હરતીતિ તથોક્તઃ, તસ્ય સદોજ્જ્વલત્પ્રત્યક્ત્વં ઉપપદ્યતે । દ્વૈતદુઃખે સતિ કથં બન્ધગ્રાસપ્રયક્ત્વમિયત્ર સર્વદા

દ્વૈતરહિત આનન્દરૂપઃ ઇતિ । અસત્પ્રપઞ્ચે સતિ કથમાનન્દરૂપતા ઇત્યત્ર તદપવાદાધિષ્ઠાનસ્ય નિત્યાનન્દત્વેન સન્માત્રતા સ્યાદિત્યાહ-સર્વાધિષ્ઠાનસન્માત્ર ઇતિ । સન્માત્રસ્ય ઇતરવ્યવચ્છેદકતયા સ્વાવિદ્યાતમોગ્રસ્તત્વાત્ ઇત્યત્ર સન્માત્રસ્ય નિષ્પ્રતિયોગિકત્વેન ઇતરવ્યવચ્છેદાસમ્ભવાત્ નિરસ્તાવિદ્યાતમોમોહોઽહમેવેતિ સમ્ભાવ્યોઽહમ્ ॥ ૧૫॥ ૐ તત્સદ્યત્પરમ્બ્રહ્મતયા રાજમાનો મહીયમાનઃ સ્વભક્તપટલાહ્લાદનકરો ભવામિ ચિદાત્મકઃ ચિન્માત્રઃ સોઽહમિત્યર્થઃ । યદોઙ્કારાર્થવિશ્વવિરાડોત્રાદિભાવમાપન્નં યત્ સ્વગતહેયાંશાપાયસિદ્ધં તદ્રામભદ્રપરઞ્જ્યોતીરસોઽહમ્ ॥ ૧૬॥ એવં પ્રત્યઞ્ચમાત્માનમાદાય મનસા પરબ્રહ્મણા એકીકુર્યાત્ પ્રત્યગભિન્નં બ્રહ્માસ્મીતિ ભાવયેદિત્યર્થઃ ॥ ૧૭॥

રામજ્ઞાનાન્મુક્તિઃ
સદા રામોઽહમસ્મીતિ તત્ત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥ ૧૮॥

ઇત્યુપનિષત્ । ય એવં વેદ સ મુક્તો ભવતીતિ યાજ્ઞવલ્ક્યઃ ॥ ૧૯॥

સદા રામોઽહમસ્મીતિ મન્ત્રો રામરહસ્યોપનિષદિ વ્યાખ્યાતઃ । રામજ્ઞાનસમકાલે રામો ભવતિ ॥ ૧૮॥ ઇત્યુપનિષત્-બ્રહ્મમાત્રપર્યવસાનં યો વેદ સ મુક્તો ભવતીત્યર્થઃ ॥ ૧૯॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ।

## તૃતીયઃ ખણ્ડઃ

બાહ્યાન્તરાવિમુક્તયાથાત્મ્યં
અથ હૈનમત્રિઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં-ય એષોઽનન્તોઽવ્યક્તપરિપૂર્ણાનન્દૈકચિદાત્મા તં કથમહં વિજાનીયામિતિ ॥ ૧॥

સ હોવાચ યાજ્ઞવલ્ક્યઃ-સોઽવિમુક્ત ઉપાસ્યો ય એષોઽનન્તોઽવ્યક્ત આત્મા સોઽવિમુક્તે પ્રતિષ્ઠિત ઇતિ ॥ ૨॥

સોઽવિમુક્તઃ કસ્મિન્ પ્રતિષ્ઠિત ઇતિ ॥ ૩॥

વરણાયાં નાસ્યાં ચ મધ્યે પ્રતિષ્ઠિત ઇતિ ॥ ૪॥

કા વૈ વરણા કા ચ નાસીતિ ॥ ૫॥

જન્માન્તરકૃતાન્ સર્વાન્ દોષાન્ વારયતીતિ તેન વરણા ભવતીતિ । સર્વાનિન્દ્રિયકૃતાન્ પાપાન્ નાશયતીતિ તેન નાસી ભવતીતિ ॥ ૬॥

કતમં ચાસ્ય સ્થાનં ભવતીતિ ॥ ૭॥

ભ્રુવોર્ઘ્રાણસ્ય ચ યઃ સન્ધિઃ સ એષ દ્યૌર્લોકસ્ય પરસ્ય ચ સન્ધિર્ભવતીતિ । એતદ્વૈ સન્ધિં સન્ધ્યાં બ્રહ્મવિદ ઉપાસત ઇતિ । સોઽવિમુક્ત ઉપાસ્ય ઇતિ । સોઽવિમુક્તં જ્ઞાનમાચષ્ટે યો વા એતદેવં વેદ ॥ ૮॥

બાહ્યાન્તરાવિમુક્તયાથાત્મ્યમવગન્તું યાજ્ઞવલ્ક્યમત્રિઃ પૃચ્છતીત્યાહ-અથેતિ । એતદપિ જાબાલોપનિષદિ વ્યાખ્યાતમ્ ॥ ૧-૮॥

(તચ્ચ વ્યાખ્યાનં ઝટિતિ પ્રત્યાયનાર્થં અત્ર ઉદાહ્રિયતે-અથ હ બૃહસ્પતિ (ભારદ્વાજ) પ્રશ્નનિર્ણયાનન્તરં કિલ એનં યાજ્ઞવલ્ક્યં બ્રહ્મપુત્રઃ અત્રિઃ પપ્રચ્છ । કિમિતિ? યઃ તારકબ્રહ્મેત્યુક્તઃ એષોઽનન્તઃ પરિચ્છેદત્રયવિરળોઽવ્યક્ત આત્મા તં ઉક્તલક્ષણમાત્માનં કથમહં વિજાનીયાં અવગચ્છેયં ઇતિ ॥ ૧॥ અત્રિપ્રશ્નોત્તરં સ હોવાચ યાજ્ઞવલ્ક્યઃ બૃહસ્પતિં પ્રતિ । તારકત્વેન ય ઉક્તઃ સોઽવિમુક્તઃ પ્રત્યગભેદેન ઉપાસ્યઃ । તત્ર હેતુઃ-ભવતા પૃષ્ટો ય એષોઽનન્તોઽવ્યક્ત આત્મા-વ્યાખ્યાતં-સોઽવિમુક્તે સોપાધિકેશ્વરે પ્રતિષ્ઠિત ઇતિ । તસ્ય નિરાવૃતત્વાત્ તસ્મિન્ અવ્યક્તોઽનન્તાત્મા ઉપલભ્યતે ॥ ૨॥ તદુપલબ્ધિસ્થાનં પૃચ્છતિ-સોઽવિમુક્તઃ કસ્મિન્ પ્રતિષ્ઠિત ઇતિ ॥ ૩॥ સોઽયમીશ્વરઃ કુત્ર સન્નિહિતઃ ઇતિ પૃષ્ટઃ ઉત્તરમાહ-વરણાયાં નાસ્યાં ચ મધ્યે પ્રતિષ્ઠિત ઇતિ । વરણાનાસ્યોર્મધ્યે પ્રતિષ્ઠિત ઇત્યર્થઃ । વરણાનાસીપ્રદેશૌ શ્રુતિર્વ્યાકરિષ્યતીતિ ન વ્યાખ્યાતમ્ ॥ ૪॥ વરણાનાસીસ્વરૂપં પૃચ્છતિ-કા વૈ વરણા કા ચ નાસીતિ ॥ ૫॥ તત્ર વરણાશબ્દાર્થમાહ-સર્વાનિતિ । સર્વાન્ જ્ઞાનકર્મેન્દ્રિયકૃતાન્ દોષાન્ વારયતિ નિવારયતીતિ તેન વરણા ભવતીતિ । સર્વાનિન્દ્રિયકૃતાન્ પાપાન્ પાપાનિ નાશયતીતિ તેન નાસી નાશી ભવતિ । સકારઃ શકારાર્થઃ ॥ ૬॥ વરણાયા નાસ્યાશ્ચ મધ્યે પ્રતિષ્ઠિત ઇત્યુક્ત્યા નાસા ભ્રૂસન્ધિઃ પ્રતીયતે, તથાઽપિ તત્પ્રદેશં પૃચ્છતિ-કતમં ચાસ્ય સ્થાનં ભવતીતિ । અસ્ય અવિમુક્તસ્યેત્યર્થઃ । સર્વત્રેતિશબ્દઃ પ્રશ્નપરિસમાપ્ત્યર્થઃ ॥ ૭॥ ભ્રુવોઃ ઘ્રાણસ્ય ચ યઃ પ્રસિદ્ધઃ સન્ધિઃ સ એષ પ્રસિદ્ધઃ બ્રહ્મકપાલસ્થાનીયદ્યુલોકસ્ય ચુબુકાવસાનસ્થાનીયસ્ય ચ પરસ્ય ચ ભૂલોકસ્યાપિ સન્ધિઃ ભવતિ લોકદ્વયસમુચ્ચયાર્થઃ ચકારઃ । એતદ્વૈ એતમેવ સન્ધીયતેઽસ્મિન્નવિમુક્તમિતિ સન્ધિઃ સ્વાત્મા તં સન્ધિ સ્વાત્માનં સન્ધ્યાં ભ્રૂઘ્રાણસન્ધૌ બ્રહ્મવિદ ઉપાસતે તત્રત્યજ્યોતિર્લિઙ્ગધ્યાનપરા ભવન્તિ । સોઽવિમુક્ત ઉપાસ્યઃ ઇતિ વ્યાખ્યાતમ્ । તજ્જ્ઞાનફલમાહ-યો વા ઇતિ । યો વૈ વિદ્વાનવિમુક્તયાથાત્મ્યં વેદ તદ્ગતહેયાંશમપોહ્ય નિર્વિશેષાત્માનઞ્જાનાતિ સ વિદ્વાન્ સોઽવિમુક્તં તત્સાક્ષાત્કારહેતુજ્ઞાનમાચષ્ટે સ્વયમીશ્વરભાવમેત્ય સ્વભક્તપટલચરમદશાયાં તારકજ્ઞાનોપદેશં કરોતિ સ્વયં નિર્વિશેષબ્રહ્મૈવ ભવતીત્યર્થઃ ॥ ૮॥ )

મુમૂર્ષૂણાં શિવકૃતરામતારકોપદેશઃ

અથ તં પ્રત્યુવાચ-

શ્રીરામસ્ય મનું કાશ્યાં જજાપ વૃષભધ્વજઃ ।
મન્વન્તરસહસ્રૈસ્તુ જપહોમાર્ચનાદિભિઃ ॥ ૯॥

તતઃ પ્રસન્નો ભગવાન્ શ્રીરામઃ પ્રાહ શઙ્કરમ્ ।
વૃણીષ્વ યદભીષ્ટં તદ્દાસ્યામિ પરમેશ્વર ॥ ઇતિ ॥ ૧૦॥

અથ સચ્ચિદાનન્દાત્માનં શ્રીરામમીશ્વરઃ પપ્રચ્છ-

મણિકર્ણ્યાં મમ ક્ષેત્રે ગઙ્ગાયાં વા તટે પુનઃ ।
મ્રિયતે દેહિ તજ્જન્તોર્મુક્તિ નાતો વરાન્તરમ્ ॥ ઇતિ ॥ ૧૧॥

અથ સ હોવાચ શ્રીરામઃ-
ક્ષેત્રેઽસ્મિંસ્તવ દેવેશ યત્ર કુત્રાપિ વા મૃતાઃ ।
કૃમિકીટાદયોઽપ્યાશુ મુક્તાઃ સન્તુ ન ચાન્યથા ॥ ૧૨॥

અવિમુક્તે તવ ક્ષેત્રે સર્વેષાં મુક્તિસિદ્ધયે ।
અહં સન્નિહિતસ્તત્ર પાષાણપ્રતિમાઽઽદિષુ ॥ ૧૩॥

ક્ષેત્રેઽસ્મિન્ યોઽર્ચયેદ્ભક્ત્યા મન્ત્રેણાનેન માં શિવ ।
બ્રહ્મહત્યાઽઽદિપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥ ૧૪॥

ત્વત્તો વા બ્રહ્મણો વાઽપિ યે લભન્તે ષડક્ષરમ્ ।
જીવન્તો મન્ત્રસિદ્ધાઃ સ્યુર્મુક્તા માં પ્રાપ્નુવન્તિ તે ॥ ૧૫॥

મુમૂર્ષોર્દક્ષિણે કર્ણે યસ્ય કસ્યાપિ વા સ્વયમ્ ।
ઉપદેક્ષ્યસિ મન્મન્ત્રં સ મુક્તો ભવિતા શિવ ॥ ૧૬॥

ઇતિ શ્રીરામચન્દ્રેણોક્તમ્ ॥

ઉત્તમાધિકારિણાં-"જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે નિત્યં ધ્યાયેત્ સદા યતિઃ" ઇતિ શ્રુતિસિદ્ધજ્યોતિર્લિઙ્ગં પ્રત્યગ્ધાતું અવિમુક્તશબ્દવાચ્યતયા પ્રતિપાદ્ય મધ્યમાધિકારિણાં કાશીક્ષેત્રમેવ અવિમુક્તમિતિ પ્રકટયિત્વા તત્ર યે કળેબરં ત્યજન્તિ તે પરમેશ્વરોપદિષ્ટરામતારકજ્ઞાનતઃ કૃતકૃત્યા ભવન્તીત્યેતદર્થં અત્રિં પ્રતિ યાજ્ઞવલ્ક્ય આહ-અથેતિ ॥ ૯-૧૦॥ પપ્રચ્છ-કિમિતિ? મણિકર્ણ્યામિતિ । "શ્રીરામસ્ય મનું કાશ્યા" મિત્યાદિ યદુક્તં તત્ સર્વં કાશીષડક્ષરસ્તુત્યર્થં, અન્યથા પરમેશ્વરસ્ય નિરાવૃતક્રિયાજ્ઞાનેચ્છાશક્તિમત્ત્વેન અવાપ્તસમસ્તકામત્વાત્ સ્વાજ્ઞદૃષ્ટ્યા શિવરામયોઃ ભેદેઽપિ તદૃષ્ટ્યૈકત્વાત્ સ્વાંશજભક્તપટલસ્વાજ્ઞાનમોચનસ્ય સ્વજ્ઞાનાયત્તત્વાત્ સ્વજ્ઞાનપ્રદાનસ્ય સ્વાયત્તત્વાદિત્યર્થઃ ॥ ૧૧-૧૬॥

ઇતિ તૃતીયઃ ખણ્ડઃ ।

## ચતુર્થઃ ખણ્ડઃ

રામસાક્ષાત્કારપ્રદાઃ મન્ત્રાઃ
અથ હૈનં ભરદ્વાજો યાજ્ઞવલ્ક્યમુવાચ-અથ કૈર્મન્ત્રૈઃ સ્તુતઃ શ્રીરામચન્દ્રઃ પ્રીતો ભવતિ સ્વાત્માનં દર્શયતિ તાન્નો બ્રૂહિ ભગવન્નિતિ ॥

સ હોવાચ યાજ્ઞવલ્ક્યઃ-પૂર્વં સત્યલોકે શ્રીરામચન્દ્રેણૈવં શિક્ષિતો બ્રહ્મા પુનરેતયા ગાથયા નમસ્કરોતિ-

વિશ્વરૂપધરં વિષ્ણું નારાયણમનામયમ્ ।
પૂર્ણાનન્દૈકવિજ્ઞાનં પરમ્બ્રહ્મસ્વરૂપિણમ્ ॥

મનસા સંસ્મરન્ બ્રહ્મા તુષ્ટાવ પરમેશ્વરમ્ ॥

ૐ યો હ વૈ શ્રીરામચન્દ્રઃ સ ભગવાનદ્વૈતપરમાનન્દ આત્મા યત્ પરં બ્રહ્મ ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમો નમઃ ॥ ૧॥ (જ્ઞાતવ્યૌ યથા પ્રથમમન્ત્રોક્તાવાદ્યન્તૌ તથા સર્વમન્ત્રેષુ) ...યશ્ચાખણ્ડૈકરસાત્મા...॥ ૨॥ ...યચ્ચ બ્રહ્માનન્દામૃતમ્...॥ ૩.. .. યત્તારકં બ્રહ્મ...॥ ૪॥ ...યો બ્રહ્મા વિષ્ણુર્મહેશ્વરો યઃ સર્વદેવાત્મા...॥ ૫॥ ...યે સર્વે વેદાઃ સાઙ્ગાઃ સશાખાઃ સેતિહાસપુરાણાઃ...॥ ૬॥ ...યો જીવાન્તરાત્મા...॥ ૭॥ ...યઃ સર્વભૂતાન્તરાત્મા ॥ ૮॥ ...યે દેવાસુરમનુષ્યાદિભાવાઃ ...॥ ૯॥ ... યે મત્સ્યકૂર્માદ્યવતારાઃ ...॥ ૧૦॥ ...યોઽન્તઃકરણચતુષ્ટયાત્મા ...॥ ૧૧॥ ...યશ્ચ પ્રાણઃ ...॥ ૧૨॥ ...યશ્ચ યમઃ ...॥ ૧૩॥ ...યશ્ચાન્તકઃ...॥ ૧૪॥ ...યશ્ચ મૃત્યુઃ ...॥ ૧૫॥ ...યચ્ચામૃતમ્...॥ ૧૬॥ ...યાનિ ચ પઞ્ચ મહાભૂતાનિ...॥ ૧૭॥ ...યઃ સ્થાવરજઙ્ગમાત્મા ...॥ ૧૮.. .. યે પઞ્ચાગ્નયઃ...॥ ૧૯॥ ...યાઃ સપ્ત મહાવ્યાહૃતયઃ...॥ ૨૦.. .. યા વિદ્યા ...॥ ૨૧॥ ...યા સરસ્વતી ...॥ ૨૨॥ ...યા લક્ષ્મીઃ...॥ ૨૩॥ ... યા ગૌરી ...॥ ૨૪॥ ...યા જાનકી ...॥ ૨૫.. .. યચ્ચ ત્રૈલોક્યં ...॥ ૨૬॥ ...યઃ સૂર્યઃ ...॥ ૨૭॥ ...યઃ સોમઃ ...॥ ૨૮॥ ...યાનિ ચ નક્ષત્રાણિ...॥ ૨૯॥ ...યે ચ નવ ગ્રહાઃ...॥ ૩૦॥ ...યે ચાષ્ટૌ લોકપાલાઃ...॥ ૩૧॥ ...યે ચાષ્ટૌ વસવઃ...॥ ૩૨.. .. યે ચૈકાદશ રુદ્રાઃ...॥ ૩૩॥ ...યે ચ દ્વાદશાદિત્યાઃ...॥ ૩૪॥ ...યચ્ચ ભૂતં ભવ્યં ભવિષ્યત્ ...॥ ૩૫॥ ...યદ્બ્રહ્માણ્ડસ્ય બહિર્વ્યાપ્તં ...॥ ૩૬.. .. યો હિરણ્યગર્ભઃ...॥ ૩૭॥ ...યા પ્રકૃતિઃ ...॥ ૩૮॥ ...યશ્ચોઙ્કારઃ...॥ ૩૯॥ ...યાશ્ચતસ્રોઽર્ધમાત્રાઃ...॥ ૪૦॥ ...યઃ પરમપુરુષઃ ...॥ ૪૧॥ ...યશ્ચ મહેશ્વરઃ ...॥ ૪૨॥ ... યશ્ચ મહાદેવઃ ...॥ ૪૩॥ ... ય ૐ નમો ભગવતે વાસુદેવાય ...॥ ૪૪॥ ...યો મહાવિષ્ણુઃ ...॥ ૪૫॥ ...યઃ પરમાત્મા ...॥ ૪૬॥ ...યો વિજ્ઞાનાત્મા ...॥ ૪૭॥

ૐ યો હ વૈ શ્રીરામચન્દ્રઃ સ ભગવાનદ્વૈતપરમાનન્દ આત્મા યઃ સચ્ચિદાનન્દાદ્વૈતૈકચિદાત્મા ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમો નમઃ ॥ ઇતિ ॥

તાન્ બ્રહ્માઽબ્રવીત્-સપ્તચત્વારિંશન્મન્ત્રૈર્નિત્યં દેવં સ્તુધ્વમ્ । તતો દેવઃ પ્રીતો ભવતિ । સ્વાત્માનં દર્શયતિ । તસ્માદ્ય એતૈર્મન્ત્રૈર્નિત્યં દેવં સ્તૌતિ સ દેવં પશ્યતિ સોઽમૃતત્વં ચ ગચ્છતીતિ મહોપનિષત્ ॥

શ્રીરામસાક્ષાત્કારોપાયબુભુત્સયા ભરદ્વાજો યાજ્ઞવલ્ક્યં પૃચ્છતીત્યાહ-અથેતિ । ઉવાચ-કિમિતિ? અથેતિ । અત્ર ઇતિહાસમવતારયતિ-પૂર્વમિતિ । કથં બ્રહ્મા શ્રીરામચન્દ્રં તુષ્ટાવેત્યત્ર શ્રીરામસાર્વાત્મ્યપ્રકટનમન્ત્રાન્ પ્રકાશયતિ-ઓમિતિ । હવા ઇતિ વૃત્તાનુસ્મરણાર્થૌ નિપાતૌ । યઃ પરમાર્થદૃષ્ટ્યા કૈવલ્યશ્રીસ્વરૂપેણ રાજમાનો મહીયમાનો ભક્તપટલાહ્લાદકરશ્ચ ભવતિ સોઽયં ષડ્ગુણૈશ્વર્યસ્વરૂપો ભગવાન્ દ્વૈતદુઃખગ્રાસાદ્વૈતપરમાનન્દાત્મતયા અવશિષ્યતે યદ્યાથાત્મ્યં પરં બ્રહ્મેતિ વિખ્યાતં યસ્તુ પુનઃ સ્વાજ્ઞદૃષ્ટ્યા ભૂર્ભુવઃસુવરિતિ ત્રૈલોક્યવપુર્વિરાટ્ ભવતિ તસ્મૈ સવિશેષનિર્વિશેષાત્મને નમો નમઃ । વૈશબ્દઃ સેવ્યસેવકયોઃ ઉપાધિકૃતભેદાસમ્ભવૈકત્વદ્યોતકઃ । ઇતિ તાન્ બ્રહ્માઽબ્રવીત્-હે દેવાઃ યૂયં સપ્તચત્વારિંશદિતિ । યસ્માદેવં તસ્માત્ ॥

ઇતિ ચતુર્થઃ ખણ્ડઃ ।

## પઞ્ચમઃ ખણ્ડઃ

રામષડક્ષરમાહાત્મ્યં

અથ હૈનં ભરદ્વાજો યાજ્ઞવલ્ક્યમુપસમેત્યોવાચ-શ્રીરામમન્ત્રરાજસ્ય માહાત્મ્યમનુબ્રૂહીતિ ॥ ૧॥

સ હોવાચ યાજ્ઞવલ્ક્યઃ-
સ્વપ્રકાશઃ પરઞ્જ્યોતિઃ સ્વાનુભૂત્યેકચિન્મયઃ ।
તદેવ રામચન્દ્રસ્ય મનોરાદ્યક્ષરઃ સ્મૃતઃ ॥ ૨॥

અખણ્ડૈકરસાનન્દસ્તારકબ્રહ્મવાચકઃ ।
રામાયેતિ સુવિજ્ઞેયઃ સત્યાનન્દચિદાત્મકઃ ॥ ૩॥

નમઃ પદં સુવિજ્ઞેયં પૂર્ણાનન્દૈકવિગ્રહમ્ ।
સદા નમન્તિ હૃદયે સર્વે દેવા મુમુક્ષવઃ ॥ ૪॥ ઇતિ ॥

ય એતં મન્ત્રરાજં શ્રીરામચન્દ્રષડક્ષરં નિત્યમધીતે સોઽગ્નિપૂતો ભવતિ સ વાયુપૂતો ભવતિ સ આદિત્યપૂતો ભવતિ સ સોમપૂતો ભવતિ સ બ્રહ્મપૂતો ભવતિ સ વિષ્ણુપૂતો ભવતિ સ રુદ્રપૂતો ભવતિ સ સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ સ સર્વક્રતુભિરિષ્ટવાન્ ભવતિ તેનેતિહાસપુરાણાનાં રુદ્રાણાં શતસહસ્રાણિ જપ્તાનિ ફલાનિ ભવન્તિ । શ્રીરામચન્દ્રમનુસ્મરણેન ગાયત્ર્યાઃ શતસહસ્રાણિ જપ્તાનિ ફલાનિ ભવન્તિ । પ્રણવાનામયુતકોટિજપ્તા ભવતિ । દશ પૂર્વાન્ દશોત્તરાન્ પુનાતિ । સ પઙ્ક્તિપાવનો ભવતિ । સ મહાન્ ભવતિ । સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૫॥

મન્ત્રરાજાર્થં તન્માહાત્મ્યં તજ્જ્ઞાનફલં ચ જ્ઞાતુમિચ્છન્ ભરદ્વાજો યાજ્ઞવલ્ક્યં પૃચ્છતીત્યાહ-અથેતિ । મુખ્યાર્થં સફલં માહાત્મ્યમનુબ્રૂહિ ॥ ૧॥ ષડક્ષરાદ્યબીજાર્થમાહ-સ્વપ્રકાશ ઇતિ ॥ ૨॥ રામાયેતિ ત્ર્યક્ષરાર્થં નિગમયત-અખણ્ડેતિ ॥ ૩॥ નમઃ શબ્દાર્થમાચષ્ટે-નમઃ પદમિતિ । વિશિષ્ટાર્થસ્તુ, રાં રામાયેત્યક્ષર ચતુષ્ટયં તત્પદલક્ષ્યબોધકં, નમઃ ઇત્યક્ષરદ્વયં ત્વમ્પદલક્ષ્યબોધકં, લક્ષણાસાપેક્ષલક્ષ્યદ્વયગતવિશેષાંશાપહ્નવસિદ્ધં નિષ્પ્રતિયોગિકબ્રહ્મમાત્રમિત્યર્થઃ । સર્વે દેવા મુમુક્ષવશ્ચ એવમેવ સદા હૃદયે નમન્તિ બ્રહ્મમાત્રં સ્વાવશેષધિયા ચિન્તયન્તિ ॥ ૪॥ ષડક્ષરજપાન્તરાળિકફલમાહ-ય ઇતિ । સ સર્વૈર્દેવૈઃ બ્રહ્મવિદિતિ જ્ઞાતો ભવતિ । ચશબ્દાત્ તારકાર્થજ્ઞાનતો મુખ્યામૃતત્વં વિદેહકૈવલ્યં ગચ્છતીતિ દ્યોત્યતે ॥ ૫॥

મન્ત્રરાજમાહાત્મ્યપ્રતિપાદકશ્લોકાઃ

અત્રૈતે શ્લોકા ભવન્તિ-
ગાણપત્યેષુ શૈવેષુ શાક્તસૌરેષ્વભીષ્ટદઃ ।
વૈષ્ણવેષ્વપિ સર્વેષુ રામમન્ત્રઃ ફલાધિકઃ ॥ ૬॥

ગાણપત્યાદિમન્ત્રેષુ કોટિકોટિગુણાધિકઃ ।
મન્ત્રસ્તેષ્વપ્યનાયાસફલદોઽયં ષડક્ષરઃ ॥ ૭॥

ષડક્ષરોઽયં મન્ત્રઃ સ્યાત્ સર્વાઘૌઘનિવારણઃ ।
મન્ત્રરાજ ઇતિ પ્રોક્તઃ સર્વેષામુત્તમોત્તમઃ ॥ ૮॥

કૃતં દિને યદ્દુરિતં પક્ષમાસર્તુવર્ષજમ્ ।
સર્વં દહતિ નિઃશેષં તૂલાચલમિવાનલઃ ॥ ૯॥

બ્રહ્મહત્યાસહસ્રાણિ જ્ઞાનાજ્ઞાનકૃતાનિ ચ ।
સ્વર્ણસ્તેયસુરાપાનગુરુતલ્પાયુતાનિ ચ ॥ ૧૦॥

કોટિકોટિસહસ્રાણિ ઉપપાતકજાન્યપિ ।
સર્વાણ્યપિ પ્રણશ્યન્તિ રામમન્ત્રાનુકીર્તનાત્ ॥ ૧૧॥

ભૂતપ્રેતપિશાચાદ્યાઃ કૂશ્માણ્ડબ્રહ્મરાક્ષસાઃ ।
દૂરાદેવ પ્રધાવન્તિ રામમન્ત્રપ્રભાવતઃ ॥ ૧૨॥

ઐહલૌકિકમૈશ્વર્યં સ્વર્ગાદ્યં પારલૌકિકમ્ ।
કૈવલ્યં ભગવત્ત્વં ચ મન્ત્રોઽયં સાધયિષ્યતિ ॥ ૧૩॥

ગ્રામ્યારણ્યપશુઘ્નત્વં સઞ્ચિતં દુરિતં ચ યત્ ।
મદ્યપાનેન યત્ પાપં તદપ્યાશુ વિનાશયેત્ ॥ ૧૪॥

અભક્ષ્યભક્ષણોત્પન્નં મિથ્યાજ્ઞાનસમુદ્ભવમ્ ।
સર્વં વિલીયતે રામમન્ત્રસ્યાસ્યૈવ કીર્તનાત્ ॥ ૧૫॥

શ્રોત્રિયસ્વર્ણહરણાદ્યચ્ચ પાપમુપસ્થિતમ્ ।
રત્નાદેશ્ચાપહારેણ તદપ્યાશુ વિનાશયેત્ ॥ ૧૬॥

બ્રાહ્મણં ક્ષત્રિયં વૈશ્યં શૂદ્રં હત્વા ચ કિલ્બિષમ્ ।
સઞ્ચિનોતિ નરો મોહાદ્યદ્યત્તદપિ નાશયેત્ ॥ ૧૭॥

ગત્વાઽપિ માતરં મોહાદગમ્યાશ્ચૈવ યોષિતઃ ।
ઉપાસ્યાનેન મન્ત્રેણ રામસ્તદપિ નાશયેત્ ॥ ૧૮॥

મહાપાતકપાપિષ્ઠસઙ્ગત્યા સઞ્ચિતં ચ યત્ ।
નાશયેત્તત્કથાઽઽલાપશયનાસનભોજનૈઃ ॥ ૧૯॥

પિતૃમાતૃવધોત્પન્નં બુદ્ધિપૂર્વમઘં ચ યત્ ।
તદનુષ્ઠાનમાત્રેણ સર્વમેતદ્વિલીયતે ॥ ૨૦॥

યત્ પ્રયાગાદિતીર્થોક્તપ્રાયશ્ચિત્તશતૈરપિ ।
નૈવાપનોદ્યતે પાપં તદપ્યાશુ વિનાશયેત્ ॥ ૨૧॥

પુણ્યક્ષેત્રેષુ સર્વેષુ કુરુક્ષેત્રાદિષુ સ્વયમ્ ।
બુદ્ધિપૂર્વમઘં કૃત્વા તદપ્યાશુ વિનાશયેત્ ॥ ૨૨॥

કૃચ્છ્રૈસ્તપ્તપરાકાદ્યૈર્નાનાચાન્દ્રાયણૈરપિ ।
પાપં ચ નાપનોદ્યં યત્ તદપ્યાશુ વિનાશયેત્ ॥ ૨૩॥

આત્મતુલ્યસુવર્ણાદિદાનૈર્બહુવિધૈરપિ ।
કિઞ્ચિદપ્યપરિક્ષીણં તદપ્યાશુ વિનાશયેત્ ॥ ૨૪॥

અવસ્થાત્રિતયેષ્વેવં બુદ્ધિપૂર્વમઘં ચ યત્ ।
તન્મન્ત્રસ્મરણેનૈવ નિઃશેષં પ્રવિલીયતે ॥ ૨૫॥

અવસ્થાત્રિતયેષ્વેવં મૂલબન્ધમઘં ચ યત્ ।
તત્તન્મન્ત્રોપદેશેન સર્વમેતત્ પ્રણશ્યતિ ॥ ૨૬॥

આબ્રહ્મબીજદોષાશ્ચ નિયમાતિક્રમોદ્ભવાઃ ।
સ્ત્રીણાં ચ પુરુષાણાં ચ મન્ત્રેણાનેન નાશિતાઃ ॥ ૨૭॥

યેષુ યેષ્વપિ દેશેષુ રામભદ્ર ઉપાસ્યતે ।
દુર્ભિક્ષાદિભયં તેષુ ન ભવેત્તુ કદાચન ॥ ૨૮॥

શાન્તઃ પ્રસન્નવદનો નક્રોધો ભક્તવત્સલઃ ।
અનેન સદૃશો મન્ત્રો જગત્સ્વપિ ન વિદ્યતે ॥ ૨૯॥

સમ્યગારાધિતો રામઃ પ્રસીદત્યેવ સત્વરમ્ ।
દદાત્યાયુષ્યમૈશ્વર્યમન્તે વિષ્ણુપદં ચ યત્ ॥ ૩૦॥

તદેતદૃચાઽભ્યુક્તમ્-
ઋચો અક્ષરે પરમે વ્યોમન્ યસ્મિન્ દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ ૩૧॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૩૨॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્ પરમં પદમ્ ॥ ૩૩॥

ૐ સત્યમિત્યુપનિષત્ ॥ ૩૪॥

એવમુક્તાર્થે એતે શ્લોકાઃ મન્ત્રાઃ મન્ત્રરાજમાહાત્મ્યપ્રતિપાદકા ભવન્તીત્યાહ-અત્રૈતે શ્લોકા ભવન્તીતિ । મન્ત્રરાજસ્ય સકલદેવતામન્ત્રતોઽપિ વૈશિષ્ટ્યમાહ-ગાણપત્યેષ્વિતિ । તત્તદ્ભાવાનુરોધેન પુરુષાર્થચતુષ્ટયપ્રાપકો મન્ત્રરાજ ઇત્યર્થઃ ॥ ૬-૨૯॥ શાન્ત ઇત્યાદિવિશેષણવિશિષ્ટો ભગવાન્ તારકાનુસ્મરણેન આરાધિતઃ સન્ પ્રસીદતિ, તેન કિં સ્યાદિત્યત્ર-દદાતીતિ । મન્ત્રાર્થજ્ઞાનપૂર્વકં યો જપતિ તસ્યૈવ વિષ્ણુપદાપ્તિઃ ॥ ૩૦॥ વિષ્ણુપદાર્થતૃષ્ણયા અસ્ય મન્ત્રાનાદરો ભવતીતિ યત્ તદેતદૃચાઽભ્યુક્તમ્ । ઋચ... ઇત્યયં મન્ત્રઃ શ્વેતાશ્વતરોપનિષદિ વ્યાખ્યાતઃ ॥ ૩૧॥ તદ્વિષ્ણોઃ ઇતિ મન્ત્રસ્તુ આરુણિકોપનિષદિ વ્યાખ્યાતઃ ॥ ૩૨-૩૩॥ કિં તદ્વિષ્ણુપદં? ઇત્યત્ર-ઓમિતિ । ઓઙ્કારાર્થતુર્યતુરીયમેવ બ્રહ્મ સત્યં, સ્વેતરગ્રાસસત્તાસામાન્યરૂપત્વાત્, તદેવ વિષ્ણુપદં સ્વમાત્રધિયૈવ પદ્યમાનત્વાત્ । ઇત્યુપનિષચ્છબ્દો રામોત્તરતાપિન્યુપનિષત્સમાપ્ત્યર્થઃ ॥ ૩૪॥

ઇતિ પઞ્ચમઃ ખણ્ડઃ ।

શ્રીવાસુદેવેન્દ્રશિષ્યોપનિષદ્બ્રહ્મયોગિના ।
રામતાપિન્યુપનિષદ્વ્યાખ્યાનં લિખિતં લઘુ ।
શ્રીરામતાપિનીવ્યાખ્યાગ્રન્થજાતં ચતુશ્શતમ્ ॥

ઇતિ શ્રીમદીશાદ્યષ્ટોત્તરશતોપનિષચ્છાસ્ત્રવિવરણે પઞ્ચપઞ્ચાશત્સઙ્ખ્યાપૂરકં
શ્રીરામતાપિન્યુપનિષદ્વિવરણં સમ્પૂર્ણમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Mrityunjay Pandey

*Ramatapinyupanishat Savyakhya*
pdf was typeset on October 30, 2025

Please send corrections to *sanskrit@cheerful.com*